सुभाषित व्याकरण - २९

Subhāṣita Vyākaraṇa - 29

(A compilation of Saṃskṛta well said verses with full grammar and meaning)

Compiler: Kishore Nayak
Editor: Padmakar Gangatirkar

मङ्गलवार श्रावण कृष्ण त्रयोदशी १९४५, शोभकृत संवत्सर

मानसेन हि दुःखेन शरीरमुपतप्यते।
अयःपिण्डेन तप्तेन कुम्भसंस्थमिवोदकम्॥१॥ - महाभा-अरण्यपर्व २.२५

मानसेन दुःखेन हि शरीरम् उपतप्यते, तप्तेन अयःपिण्डेन कुम्भसंस्थम् उदकम् इव ॥

A person's body is tormented by mental distress just like immersing hot iron ball in a pot of water.

तप्तेन, अयःपिण्डेन, मानसेन & दुःखेन- all in पु/न. लिं. तृ. वि. ए. व. of तप्त- adjctv- heated, distressed, afflicted- क. भू. धा. वि. of तप्- तपति १ ग. प. प. to be hot or give out heat, अयःपिण्डः/ण्डम्- a ball of iron- अयस्- न. लिं.- iron, steel, पिण्डः/ण्डम्- a round mass, a ball- अयसः पिण्डः/ण्डम्- ष. तत्पुरुष स., मानस- adjctv- pertaining to mind, mental, product of mind (मनस्- न. लिं.- mind, heart, thought) & दुःखम्- sorrow, distress, torment, कुम्भसंस्थम्- one, that is in a pot- कुम्भः- a pitcher, pot, संस्थम्- adjctv- existing, dwelling, staying- कुम्भे संस्थम्- स. तत्पुरुष स. & उदकम्- water-cooled both in न. लिं. प्र. वि. ए. व., शरीरम्- body- in न. लिं. द्वि. वि. ए. व., उपतप्यते- कर्मणि प्रयोग प्र. पु. ए. व. of उप+ तप्- to heat, warm- (तप्- see above), हि- just, only, surely & इव- like, as, similar to- both अव्ययs

मतिमन्तो ह्यतो वैद्याः शमं प्रागेव कुर्वते ।
मानसस्य प्रियाख्यानैः सम्भोगोपनयैर्नृणाम् ॥२॥ - महाभा. अरण्यपर्व २.२३

मतिमन्तः हि अतः वैद्याः नृणाम् मानसस्य प्रियाख्यानैः सम्भोगोपनयैः शमं प्राग् एव कुर्वते॥

Intelligent persons and especially the physicians alleviate mental distress of men by pleasant words and employment of enjoyable activities, as soon as possible.

मतिमन्तः & वैद्याः- both in पु. लिं. प्र. वि. ब. व. of मतिमत्- knowledgeable, wise- मतिः- स्त्री. लि.- intellect, understanding, knowledge, मत्- prefix implies quality, possession & वैद्यः- learned, scholar, healer or doctor, नृणाम्- in पु. लिं. ष. वि. ब. व. of नृ- a man, person, मानसस्य- in पु/न. लिं. ष. वि. ए. व. of मानस- related to mind, mental- (मनस्- न. लिं- mind, heart), प्रियाख्यानैः & सम्भोगोपनयैः- both in पु/न. लिं. तृ. वि. ब. व. of प्रियाख्यानम्- sweet talk, pleasant words- प्रिय- adjctv- dear, pleasant, आख्यानम्- speaking, a tale, lecture- प्रियम् आख्यानम्- वि. पू. प. कर्मधारय समास. & सम्भोगोपनयः- offer of useful things- सम्भोगः- enjoyment (in general), उपनयः- bringing near, employment, use- सम्भोगस्य उपनयः- ष. तत्पुरुष स., शमम्- in पु. लिं. द्वि. वि. ए. व. of शमः- elleviation, satisfaction, cessation, कुर्वते- वर्त. आ. प. प्र. पु. ब. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, प्राक्- before, at first, एव- only, mere, just- प्राग् एव- in advance, beforehand, अतः (अतस्)- than this, from this, hence, हि- indeed, for, because, for instance, surely- all अव्ययs

मानसं शमयेत्तस्माज्ज्ञानेनाग्निमिवाम्बुना ।
प्रशान्ते मानसे दुःखे शारीरमुउपशाम्यति॥३॥ -महाभा- अरण्यपर्व २.२६

अम्बुना अग्निम् इव, ज्ञानेन मानसम् (दुःखम्) तस्मात् शमयेत् । मानसे प्रशान्ते हि अस्य शारीरम् उपशाम्यति॥

Just like quenching fire with water, one should alleviate the mental distress with Knowledge. Once mental distress is calmed down, his physical distress surely disappears.

अम्बुना & ज्ञानेन- both in न. लिं. तृ. वि. ए. व. of अम्बु- water & ज्ञानम्- understanding, knowledge, learning, अग्निम् & मानसम्- in पु/न. लिं. द्वि. वि. ए. व. of अग्निः- fire & मानस- adjctv- one related to mind or heart- (मनस्- mind or heart), तस्मात्- from that, with that- in पु/न. लिं. पं. वि. ए. व. of तद्- he, it, शमयेत्- प्रयोजक विध्यर्थ प्र. पु. ए. व. of शम्- शमयति- ते to pecify, allay, calm- (शम्- शाम्यति ४ ग. प. प. to be calm, quiet), मानसे & प्रशान्ते- in पु/न. लिं. स. वि. ए. व. of मानस- see above & प्रशान्त- calmed down, tranquilled- क. भू. धा. वि. of प्र+ शम्- to become calm- see above, अस्य- in पु/न. लिं. ष. वि. ए. व. of इदम्- this, it, he, शारीरम्- one related to body, physical- in न. लिं. प्र. वि. ए. व.- (शरीरम्- body), उपशाम्यति- वर्त. प्र. पु. ए. व. of उप+ शम्- to allay, calm- see above, इव like that, similar to, हि- indeed, surely, certainly- both अव्ययs

स्नेहमूलानि दुःखानि स्नेहजानि भयानि च ।
शोकहर्षौ तथाऽऽयासः सर्वं स्नेहात्प्रवर्तते ॥४अ॥

स्नेहात्करणरागश्च प्रजज्ञे वैषयस्तथा ।
अश्रेयस्कावुभावेतौ पूर्वस्तत्र गुरुः स्मृतः ॥४ब॥ -महाभा- अरण्यपर्व २.२८ & २९

दुःखानि स्नेहमूलानि, भयानि स्नेहजानि च (भवति)। शोकहर्षौ तथा आयासः सर्वं स्नेहात् प्रवर्तते। स्नेहात् करणरागः वैषयः च तथा प्रजज्ञे। एतौ उभौ अश्रेयस्कौ, तत्र पूर्वः गुरुः स्मृतः (भवति) ॥

Affection or attachments are the roots of all pains or sorrows. Fears are also born out of affection. Grief, joy and stress originate from attachment. Affection generates addiction and desire for sensual pleasures. Both addiction and desire are harmful. But, between them, the former is more powerful.

दुःखानि, स्नेहमूलानि, स्नेहजानि and भयानि- all in न. लिं. प्र. वि. ब. व. of दुःखम्- sorrow, distress, pain, स्नेहमूलम्- rooted in affection- स्नेहः- affection, love, tenderness, मूलम्- root, basis, origin- स्नेहः मूलम् यस्य तद्- बहुव्रीहि स., स्नेहजम्- caused by love, born out of love- स्नेहात् जायते इति- उपपद तत्पुरुष स. & भयम्- fear, dread, fright, शोकहर्षौ- in पु. लिं. प्र. वि. द्वि. व. of शोकहर्षः- sorrow and joy- शोकः च हर्षः च- द्वंद्व स., आयासः- exertion, difficulty, fatigue, करणरागः- addiction, feeling or interest in doing- करणम्- action, doing, performing, रागः- interest, feeling- करणे रागः- तृ. तत्पुरुष स., वैषयः- relating to sensual, pertaining to objects of sense- (विषयः- an object of sense, worldly concern), पूर्वः- the former, previous, गुरुः- strong, mighty, heavy, स्मृतः- considered, declared, regarded- स्मृत- क. भू. धा. वि. of स्मृ- स्मरति १ ग. प. प. to recall, remember, think of- all in पु. लिं. प्र. वि. ए. व., सर्वम्- all, entire thing, whole- in न. लिं. प्र. वि. ए. व., स्नेहात्- in पु. लिं. पं. वि. ए. व. of स्नेहः- see above, प्रवर्तते- originates, gets generated- वर्त. प्र. पु. ए. व.of प्र+ वृत्- to originate- (वृत्- वर्तते १ ग. आ. प. to be, to exist, become), प्रजज्ञे- परोक्ष भूत. प्र. पु. ए. व. of प्र+ जन्- to originate- (जन्- जायते ४ ग. आ. प. to be born, produced), एतौ, उभौ & अश्रेयस्कौ- all in पु. लिं. प्र. वि. द्वि. व. of एतद् (एषः)- this, उभः- both, a couple, अश्रेयस्कः- troublesome harmful, unpreferred- (श्रेयस्- adjctv- blessing, bliss, virtue- न श्रेयस्- अश्रेयस्- bad, unworthy- नञ् तत्पुरुष स.- अश्रेयः करोति इति- अश्रेयस्कः- उपपद तत्पुरुष स., च-and, तथा- and, like that & तत्र- there, among them- all अव्ययs

विप्रयोगे न तु त्यागी दोषदर्शी समागमात् ।
विरागं भजते जन्तुर्निर्वैरो निष्परिग्रहः ॥५॥ - महाभा- अरण्यपर्व २.३०

(यः) विप्रयोगे त्यागी (भवति), (सः) न तु (त्यागी अस्ति)। (यः) समागमात् दोषदर्शी (भवति), (तथा) विरागं भजते, (सः त्यागी भवति)। (एषः) जन्तुः निर्वैरः निष्परिग्रहः (भवति) ॥

One, who gives up (objects of pleasures), after not getting them is not an ascetic. The one, who understands their evil consequences and detaches from them, is the real ascetic. That person is free from enmity towards anyone and is free from worldly bonds.

विप्रयोगे- in पु. लिं. स. वि. ए. व. of विप्रयोगः- separation, not getting, failed to obtain, त्यागी (त्यागिन्)- one, who gives up willingly, forsaker, ascetic दोषदर्शी (दोषदर्शिन्)- one, who understands or perceives evil- दोषः- fault, defect, sin, guilt, offense, evil, injurious consequence, दर्शिन्- adjctv- perceiving, seeing, understanding- दोषान् पश्यति इति- उपपद तत्पुरुष स., जन्तुः- a living being, person, creature, निर्वैरः- free from enmity- वैरम्- hostility, enmity, animosity- निर्गतम् वैरम् यस्मात् सः- बहुव्रीहि स., निष्परिग्रहः- free from worldly bonds/possessions- परिग्रहः- property, family, possession, household, surrounding- निरस्तः परिग्रहः येन सः- बहुव्रीहि स.- all in पु. लिं. प्र. वि. ए. व., समागमात्- in पु. लिं. पं. वि. ए. व. of समागमः- encountering, meeting, association, विरागम्- in पु. लिं. द्वि. वि. ए. व. of विरागः- detachment, disinclination, indifference- रागः- affection, feeling, interest- भजते- वर्त. प्र. पु. ए. व. of भज्- भजति- ते १ ग. उ. प. to practice follow, to resort to, observe, न- no, not, तु- but, on the other hand, न तु- just not, certainly not- all अव्यय

यदा भवति निर्द्वन्द्वो मुनिर्मौनं समास्थितः।
अथ लोकमिमं जित्वा लोकं विजयते परम्॥६॥ -महाभा-१. ८५.१७, मत्स्यपुराण- ४०.१६

पाठभेद- चतुर्थपादः 'लोकञ्चापि जयेत्परम्'।

यदा मुनिः मौनं समास्थितः, निर्द्वन्द्वः भवति, अथ इमं लोकं जित्वा परं लोकं विजयते (परं लोकं च अपि जयेत्) ॥

A sage, fully engaged to a vow of silence, realizes the non-duality (in Nature). After conquering this world, he then proceeds to win the other world also.

मुनिः- an ascetic, a sage, holy man, saint, समास्थितः- well abiding, fully practicing, totally resorting to- समास्थित- क. भू. धा. वि. of समा+ स्था- to fully practice, undergo, engage in- (स्था- तिष्ठति १ ग. प. प. to stay, stand) निर्द्वन्द्वः- one who has banished duality, indifferent in regard to opposite pairs of feeling (pleasure/pain, hot/cold, undisputed- द्वन्द्व- a pair, a couple of anything, a couple of opposite conditions- निरस्तम् द्वन्द्वम् येन सः- निर्द्वन्द्वः- बहुव्रीहि स.- all in पु. लि. प्र. वि. ए. व., मौनम्- silence- in न. लि. द्वि. वि. ए. व., इमम्, लोकम्, परम्- all in पु. लि. द्वि. वि. ए. व. of इदम्- this, लोकः- world & परः- adjctv- the other, another, जित्वा- पू. का. वा. धा. सा. अव्यय of जि- जयति- १ ग. प. प. to win, defeat, विजयते & भवति- both वर्त. प्र. पु. ए. व. (आ. प.) of वि+ जि- to conquer, defeat, excel, surpass- (जि- जयति १ ग. प. प. to win, defeat) & भू- १ ग. प. प. to be, to exist, to become, जयेत्- विध्यर्थ प्र. पु. ए.

व. of जि- जयति- see above, यदा- when, at the time when, च- and, अपि- also, even, अथ- particle used in the biginning of work to imply: here, now, then, afterwards, supposing etc.- all अव्यय

यदा स्तुतिं च निन्दां च समत्वेनैव पश्यति।
काञ्चनं चायसं चैव सुखं दुःखं तथैव च ॥७अ॥

शीतमुष्णं तथैवार्थमनर्थं प्रियमप्रियम्।
जीवितं मरणं चैव ब्रह्म संपद्यते तदा ॥७ब॥ -महाभा- शान्तिपर्व १२.३३४.३७/३८

यदा स्तुतिं च निन्दां च, काञ्चनं च अयसं च एव, सुखं दुःखं तथा एव च, शीतम् उष्णं तथा एव अर्थम् अनर्थं, प्रियम् अप्रियम्, जीवितं मरणं च एव, समत्वेन एव पश्यति, तदा ब्रह्म संपद्यते ॥

A person succeeds in realising Brahman-ब्रह्मन्, when he considers praise and criticism, gold and iron, happiness and sorrow, hot and cold, wealth and poverty, pleasant and unpleasant and finally life and death with equanimity.

स्तुतिम् & निन्दाम्- स्त्री. लिं. द्वि. वि. ए. व. of स्तुतिः- praise, adulation & निन्दा- blame, accusation, काञ्चनम्-gold, सुखम्- joy, happiness, दुःखम्- sorrow, pain, शीतम्- adjctv- cold, sluggish, उष्णम्- adjctv- hot, warm, प्रियम्- pleasing, dear- प्रिय- adjctv- beloved, dear- न प्रिय- अप्रिय- नञ् तत्पुरुष स.- अप्रियम्- unpleasant, hateful, जीवितम्- living, survival- जीवित- क. भू. धा. वि. of जीव्- जीवति- १ ग. प. प. to be alive, to live, मरणम्- death- all in न. लिं. द्वि. वि. ए. व., ब्रह्म- in न. लिं. प्र. वि. ए. व. of ब्रह्मन्- the Supreme Being, the all-pervading soul and spirit of the universe, अर्थम्, अनर्थम्, & अयसम्- all in पु. लिं. द्वि. वि. ए. व. of अर्थः- meaning, purpose, motive, wealth- न अर्थः- अनर्थः- नञ् तत्पुरुष स.- disaster, useless, worthless & अयस्- iron- (actually अयस्- in पु. लिं. means- Fire & अयस्- in न. लिं.- means- iron, steel- such variations in epics are seen sometimes), समत्वेन- तृ. वि. ए. व. of समत्व- equality, uniformity, similarity- (सम- adjctv- same, identical, like, similar, equal, त्व- suffix implies quality or nature) पश्यति & संपद्यते- both वर्त. प्र. पु. ए. व. of सं+ पद्- to get, obtain, attain, succeed, bring about- (पद्- पद्यते ४ ग. प. प. to go, move) & दृश्- १ ग. प. प. to see, look at, consider, conceive, यदा- when, at which time, तदा- then, at that time, तथा- likewise, similar to, as, and, एव- just, merely, only, च-and- all अव्ययs

ज्ञानान्वितेषु युक्तेषु शास्त्रज्ञेषु कृतात्मसु ।
न तेषु सज्जते स्नेहः पद्मपत्रेष्विवोदकम् ॥८॥ -महाभा. अरण्यपर्व २.३४

ज्ञानान्वितेषु, युक्तेषु, शास्त्रज्ञेषु, कृतात्मसु, तेषु पद्मपत्रेषु उदकम् इव स्नेहः न सज्जते॥

Worldly attachment does not stick, just like water on the lotus leaf, to those who are knowledgeable, diligent, scriptural scientists and those with self control.

ज्ञानान्वितेषु, युक्तेषु, शास्त्रज्ञेषु, कृतात्मसु & तेषु- all in पु. लिं. स. वि. ब. व. of ज्ञानान्वितः- one, who is endowed with knowledge, understanding- ज्ञानम्- knowledge, understanding, realisation, अन्वितः- endowed with, possessed of- अन्वित- क. भू. धा. वि. of अनु+ इ- to follow, to succeed, go after- ज्ञानेन अन्वितः- तृ. तत्पुरुष स., युक्तः- fit, proper, diligent, active- क. भू. धा. वि. of युज्- युनक्ति- युंक्ते ७ ग. उ. प.

to be able, to join, to be endowed with, शास्त्रज्ञः- knowledgeable in science or scriptures- शास्त्रम्- science, scriptures, ज्ञः- suffix implies: knowing, knowledgeable- शास्त्रम् जानाति इति- उपपद तत्पुरुष स., कृतात्मन्- having control over oneself, self-controlled- कृत- done, accomplished- क. भू. धा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do, make आत्मन्- oneself, soul, mind- कृतः आत्मा येन सः-बहुव्रीहि स. & तद्- he, पद्मपत्रेषु- in न. लिं. स. वि. ब. व. of पद्मपत्रम्- a lotus leaf- पद्मम्- a lotus, पत्रम्- a leaf- पद्मस्य पत्रम्- ष. तत्पुरुष स., उदकम्- water- in न. लिं. प्र. वि. ए. व., सज्जते- वर्त. प्र. पु. ए. व. of सस्ज्- सज्जति- ते १ ग. उ. प. to go, become ready, to be attached to, स्नेहः- affection, love, attachment- in पु. लिं. प्र. वि. ए. व., इव- like, similar to, as, न- no, not- both अव्ययs

रागाभिभूतः पुरुषः कामेन परिकृष्यते ।
इच्छा सञ्जायते तस्य ततस्तृष्णा विवर्धते॥९अ॥

तृष्णा हि सर्वपापिष्ठा नित्योद्वेगकरी स्मृता ।
अधर्मबहुला चैव घोरा पापानुबन्धिनी ॥९ब॥ -महाभा- अरण्यपर्व २.३४/३५

रागाभिभूतः पुरुषः कामेन परिकृष्यते, तस्य इच्छा सञ्जायते, ततः (तस्य) तृष्णा विवर्धते। तृष्णा हि सर्वपापिष्ठा नित्योद्वेगकरी स्मृता, (सा) अधर्मबहुला च एव घोरा पापानुबन्धिनी (अस्ति) ॥

A person, overwhelmed with passion, gets very attracted to sensual pleasure and starts longing for it. From that, greed starts growing. This greed is said to be indeed the greatest sin among all sins. It constantly creates agitation, is very much unrighteous and binds one to criminal acts.

रागाभिभूतः- one who is overcome with passion- रागः- passion, interest, feeling, pleasure अभिभूतः- dominated, overcomed, subdued assailed- अभिभूत- क. भू. धा. वि. of अभि+ भू- (भू- भवति १ ग. प. प. to be, to exist, to become)- रागेण अभिभूतः- तृ. तत्पुरुष स. & पुरुषः- man, person, human, कामेन- in पु. लिं. तृ. वि. ए. व. of कामः- wish, desire, परिकृष्यते- कर्मणि प्रयोग प्र. पु. ए. व. of परि+ कृष्- to get very attracted, drawn badly- (कृष्- कर्षति १ ग. प. प. to attract, draw, drag), इच्छा- want, desire, तृष्णा- thirst, greed, सर्वपापिष्ठा- a sinner among all, a great criminal of all- सर्व- a pron. adjctv- all, entire, whole, पापिष्ठ-adjctv- Most sinful, very wicked- (superlative of पाप- sin, crime)- सर्वासु पापिष्ठा या सा- बहुव्रीहि स., नित्योद्वेगकरी- always keeping one in agitation fear, anxiety- नित्य- adjctv- daily, always, उद्वेग- agitation fear, anxiety- नित्यम् उद्वेगम् करोति इति- नित्यउद्वेगकरी- उपपद तत्पुरुष स., स्मृता- declared, said- स्मृत- क. भू. धा. वि. of स्मृ- स्मरति १ ग. प. प. to to remember, recall, think of, declare, अधर्मबहुला- full of unrighteousness, wickedness, unjust acts- धर्मः- just act, righteousness, न धर्मः- अधर्मः- नञ् तत्पुरुष स., बहुल-adjctv- ample, abundant plentiful, thick- बहुल: अधर्म:- वि. उ.प. कर्मधारय स., घोरा- adjctv- frightful, horrible, awful & पापानुबन्धिनी- binding down to criminal acts- पाप- see above, अनुबन्धिन्- adjctv- connected with, tied down to, having as consequence- पापस्य अनुबन्धिन् या सा- बहुव्रीहि स.- all in स्त्री. लिं. प्र. वि. ए. व., विवर्धते, सञ्जायते & प्रवर्तते- all वर्त. प्र. पु. ए. व. of वि- वृध्- to grow very much (वृध्- वर्धते- १ ग. आ. प. to grow, increase) सं+ जन्- to arise, grow, to be produced- (जन्- जायते ४ ग. आ. प. to be born, to arise), तस्य- his- in पु. लिं. ष. वि. ए. व. of तद्- he, ततः (ततस्)- from that, thence, च- and, एव- only, just, merely, हि- surely, certainly, alone- all अव्ययs

समुच्चरन्त्यतिवादाश्च वक्त्राद्यैराहतः शोचति रात्र्यहानि।
परस्य नामर्मसु ते पतन्ति तान्पण्डितो नावसृजेत्परेषु ॥१०॥ - महाभा- सभापर्व ६६.०७

वक्त्राद् अतिवादान् समुच्चरन्ति च, यैः आहतः रात्र्यहानि शोचति। ते (अतिवादाः) परस्य नामर्मसु पतन्ति। पण्डितः तान् परेषु न अवसृजेत् ॥

People utter very abusive words from their mouths. Those words torment a person struck by them days and nights. Those words strike the very essence of that person. A wise person should never let loose them on others.

वक्त्रात्- in न. लि. पं. वि. ए. व. of वक्त्रम्- mouth, अतिवादान् & तान्- both in पु. लि. द्वि. वि. ब. व. of अतिवादः- abusive or harsh talk- अति- अव्यय- excessive, improper, beyond, वादः- talk, allegation, controversy- वादान् अतिकृत्य- अव्ययीभाव स. & तद्- that, समुच्चरन्ति & पतन्ति- both वर्त. प्र. पु. ब. व. of समुद्+ चर्- to utter, pronounce- (चर्- चरति १ ग. प. प. to walk, move, roam graze) & पत्- पतति १ ग. प. प. to fall, fall down, यैः- by whom- in पु. लि. तृ. वि. ब. व. of यद्- who, ते- they- in पु. लि. प्र. वि. ब. व. of तद्- he, रात्र्यहानि- न. लि. प्र. वि. ब. व. of रात्र्यहन्- all of night and day- रात्रिः- स्त्री. लिं.- a night, अहन्- न. लिं- a day- रात्रिः च अहनि च- रात्र्यहन्- द्वंद्व स., शोचति- वर्त. प्र. पु. ए. व. of शुच्- to grieve, to be afflicted, mourn over, पण्डितः- a learned man, wise person & आहतः- struck, injured, beaten- आहत- क. भू. धा. वि. of आ+ हन्- to strike, hit, beat- (हन्- हन्ति २ ग. प. प. to kill, strike)- both in पु. लि. प्र. वि. ए. व., परेषु & नामर्मसु- both in पु/न. लि. स. वि. ब. व. of परः- other person, another man & नामर्मन् = न अमर्मन्= मर्मन्- (use of double negative)- न. लि.- the vitals, a vital part of the body, परस्य- in पु. लि. ष. वि. ए. व. of परः-see above, अवसृजेत्- विध्यर्थ प्र. पु. ए. व. of अव+ सृज्- to pour out, to throw to let loose- (सृज्- सृजति ६ ग. प. प. to produce, create, put on), च- and & न- no, not- both अव्ययs

पीतः क्रुद्धेन तातश्चरणतलहतो वल्लभो येन रोषाद्-
आबाल्याद् विप्रवर्यैः स्ववदनविवरे धार्यते वैरिणी मे।
गेहं मे छेदयन्ति प्रतिदिवसमुमाकान्तपूजानिमित्तं
तस्मात्खिन्ना सदाहं द्विजकुलनिलयं नाथ युक्तं त्यजामि॥१५.१६॥-आर्या

नाथ, येन क्रुद्धेन (मम) तातः पीतः, (तथा) रोषाद् वल्लभः चरणतलहतः, (येः) विप्रवर्यैः आबाल्यात् स्ववदनविवरे मे वैरिणी धार्यते, (तथा ये) प्रतिदिवसम् उमा-कान्त-पूजा-निमित्तं मे गेहं छेदयन्ति, तस्मात् अहं सदा खिन्ना, द्विजकुलनिलयं युक्तं त्यजामि॥

(Said by Lakṣmī to Viṣṇu why she does not stay with Brahmins!))

Oh, my dear husband! The reason why I purposely avoid staying in the household of learned people (Brahmins) is that one (of them, Agastya) drank up my father (the Ocean) in anger. The other one (Bhrugu), with anger, kicked my husband (Vishnu) with sole of his foot. The best among them hold my adversary (Saraswati) on the tip of their tongue (cavity of mouth). They damage my residence (lotus pond) everyday, for the sake of Pooja of Shiva (while plucking lotus), since childhood and that makes me sad.

नाथ- Oh dear husband- in पु. लिं. सं. वि. ए. व., येन & क्रुद्धेन- both in पु. लिं. तृ. वि. ए. व. of यद्- who & क्रुद्धः- angry- क्रुद्ध- क. भू. धा. वि. of क्रुध्- क्रुध्यति- ४ ग. ग. प. प. to be angry, तातः- father, पीतः- drunk, swallowed- क. भू. धा. वि. of पा- पिबति १ ग. प. प. to drink, वल्लभः- husband, beloved, चरणतलहतः- kicked by the sole of the foot- चरण- foot, तल- sole, surface, हत- struck- क. भू. धा. वि. of हन्- हन्ति २ ग. प. प. to strike, kill- चरणस्य तलः- चरणतलः- ष. तत्पुरुष स. & चरणतलेन हतः- चरणतलहतः- तृ. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., रोषाद् & आबाल्यात्- both in पु. लिं. पं. वि. ए. व. of रोषः- anger, rage &

आबाल्यः- since the childhood- आ- a prefix implies: from, ever since, बाल्यः- childhood, विप्रवर्यैः- in पु. लिं. तृ. वि. ब. व. of विप्रवर्यः- best among the Brahmin- विप्रः- a wise man, sage, a Brahmin & वर्यः- adjctv- best, excellent, selected, eligible- विप्रेषु वर्यः- स. तत्पुरुष स., स्ववदनविवरे- in न. लिं. स. वि. ए. व. of स्ववदनविवरम्- in the cavity of one's own mouth- स्व- one's own, वदनम्- mouth, विवरम्- cavity- स्वस्य वदनम्- स्ववदनम् & स्ववदनस्य विवरम्- स्ववदनविवरम्- both ष. तत्पुरुष स., अहम्- I & मे (मम)- my, mine- both प्र. वि. & ष. वि. ए. व. of अस्मद्- I, वैरिणी- enemy, adversary & खिन्ना- sad, disturbed, afflicted- खिन्न- क. भू. धा. वि. of खिद्- खिंदति ६ ग. प. प. to afflict, strike- both in स्त्री. लिं. प्र. वि. ए. व., धार्यते- कर्मणि प्रयोग प्र. पु. ए. व. of धृ- धरति १ ग.प. प. to hold, carry, प्रतिदिवसम्- everyday- दिवसम्- day- दिवसे दिवसे- प्रतिदिवसम्- अव्ययीभाव स., उमाकान्तपूजानिमित्तम्- for the sake of Pooja of Shiva- उमा- पार्वती, कान्तः- husband, beloved, पूजा- worship, निमित्तम्- purpose, for- उमायाः कान्तः- उमाकान्तः, उमाकान्तस्य पूजा- उमाकान्तपूजा & उमाकान्तपूजायाः निमित्तम्- उमाकान्तपूजानिमित्तम्- all ष. तत्पुरुष स.- both in न. लिं. प्र. वि. ए. व., गेहम्- house dwelling, habitation, द्विजकुलनिलयम्- household of wise men or Brahmins- द्विज- twice born, Brahmin, कुल- race, family, निलयम्- house- द्विजस्य कुलम्- द्विजकुलम् & द्विजकुलस्य निलयम्- द्विजकुलनिलयम्- all ष. तत्पुरुष स., & युक्तम्- cleverly, diligently- all in न. लिं. द्वि. वि. ए. व., छेदयन्ति- प्रयोजक वर्त. प्र. पु. ब. व. of छिद्- छेदयति- ते- to disturb, destroy- (छिद्- छिनत्ति, छिंते ७ ग. उ. प. to cut, tear), त्यजामि- वर्त. उ. पु. ए. व. of त्यज्- त्यजति १ ग. प. प. to avoid, abandon, leave- तस्मात्- therefore & सदा- always, constantly- both अव्यय

नश्यन्नपि महान् ह्लादं न खेदं सम्प्रयच्छति।
चन्दनं दग्धमप्यासीदानन्दायैव जीवताम् ॥१२॥-योगवासिष्ठ ६.७५.५२, -संस्कृतसाहित्यमसमः

महान् (जनः), नश्यन् अपि, ह्लादम् सम्प्रयच्छति, न खेदं (सम्प्रयच्छति)। चन्दनम् दग्धम् अपि जीवताम् आनन्दाय एव आसीत्॥

Great people provide joy and not sorrow (to others), even faced with their own destruction. Sandalwood, even when it is burnt, continues to give pleasure to living beings.

महान् & नश्यन्- both in पु. लिं. प्र. वि. ए. व. of महत्- great, noble, virtuous & नश्यत्- one which is getting destroyed, ruined- कर्तरि वर्त. का. वा. धा. सा. वि. of नश्- नश्यति- ४ ग. प. प. to be destroyed, ruined, ह्लादम् & खेदम्- both in पु. लिं. द्वि. वि. ए. व. of ह्लादः- joy, happiness, delight & खेदः- sorrow, distress, pain, सम्प्रयच्छति- वर्त. प्र. पु. ए. व. of सम्प्र+ दा- to fully provide, to give completely- (दा- यच्छति- १ ग. प. प. to give, grant), चन्दनम्- sandalwood & दग्धम्- burnt, scorched- दग्ध- क. भू. धा. वि. of दह्- दहति १ ग. प. प. to burn, scorch- both in न. लिं. प्र. वि. ए. व., जीवताम्- in पु. लिं. ष. वि. ब. व. of जीवत्- one who is living, a living being- कर्तरि वर्त. का. वा. धा. सा. वि. of जीव्- जीवति- १ ग. प. प. to be alive, आनन्दाय- in पु. लिं. च. वि. ए. व. of आनन्दः- joy, happiness, delight, आसीत्- अनद्यतनभूत. प्र. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, अपि- also, even, न- no, not, एव- only, just, alone- all अव्ययs

कान्ताकटाक्षविशिखा न लुनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयाश्च न लोभपाशैः
लोकत्रयं जयति कृत्स्नमिदं स धीरः॥१३॥ --भर्तृहरिनीतिशतक ७६

यस्य चित्तम् कान्ता-कटाक्ष-विशिखाः न लुनन्ति, कोपकृशानुतापः न निर्दहति, भूरिविषयाः च लोभपाशैः न कर्षन्ति, सः धीरः कृत्स्नम् इदम् लोकत्रयम् जयति॥

That courageous man will conquer all these three worlds, whose heart does not get crippled with the arrows of glance of a beloved woman, who does not get scorched by the fire generated by anger and who does not get entangled by greedy nooses of many worldly pleasure,

यस्य-पु. लिं. ष. वि. ए. व. of यद्- who, कान्ताकटाक्षविशिखाः & भूरिविषयाः- both पु. लिं. प्र. वि. ब. व. of कान्ताकटाक्षविशिखः- an arrow in a form of glance of a beloved woman- कान्ता- beloved, wife, कटाक्ष- a glance, side-long look, विशिखः- an arrow- कान्तायाः कटाक्षः- कान्ताकटाक्षः- ष. तत्पुरुष स. & कान्ताकटाक्षः इव विशिखः- कान्ताकटाक्षविशिखः- उ. पू. प. कर्मधारय स. & भूरिविषयः- numerous objects of worldly pleasure- भूरि- adjctv- many, numerous, विषयः- an object of sense, worldly pleasure- भूरयः विषयाः- भूरिविषयाः- वि. पू. प. कर्मधारय स., लुनन्ति & कर्षन्ति- both in वर्त. प्र. पु. ब. व. of लू- लुनाति लुनीते ९ ग. उ. प. to cut off, devide & कृष्- कर्षति- १ ग. प. प. to draw, tighten, tear, निर्दहति & जयति- both in वर्त. प्र. पु. ए. व. of निर्+ दह्- to burn badly- (दह्- दहति १ ग. प. प. to burn, scorch) & जि- १ ग. प. प. to win, conquer, कोपकृशानुतापः- कोपः- anger, कृशानुः- fire, तापः- distress, agony- कोपः कृशानुः इव- कोपकृशानुः- उ. उ. प. कर्मधारय स. & कोपकृशानोः तापः- कोपकृशानुतापः- ष. तत्पुरुष स., सः (तद्)- he & धीरः- brave-heart, strong-man- all in पु. लिं. प्र. वि. ए. व., चित्तम्- mind, heart, कृत्स्नम्- adjctv- entire, whole, इदम्- this, it & लोकत्रयम्- all three worlds taken collectively- लोकः- world, त्रयम् - three लोकानाम् त्रयम् - लोकत्रयम्- ष. तत्पुरुष स .- all in न. लिं. द्वि. वि. ए. व., लोभपाशैः- in पु. लिं. तृ. वि. ब. व. of लोभपाशः- a noose of greed- लोभः- greed, पाशः- noose- लोभः पाशः इव - लोभपाशः- उ. पू. प. कर्मधारय स., न- no, not, च- and, - both अव्ययs

कार्यमण्वपि काले तु कृतमेत्युपकारताम् ।
महानत्युपकारोऽपि रिक्ततामेत्यकालतः ॥१४॥- योगवासिष्ठ- प्र.१,स.७,श्लो.२६, वैदिकवाङ्मयम्

अणु अपि कार्यम्, काले कृतम्, उपकारताम् एति। महान् अत्युपकारः अपि अकालतः (कृतम्) तु रिक्तताम् एति॥

Even a very small help, given at the right time is much appreciated. On the other hand, a great help offered at the wrong time is a wasted effort.

अणु- adjctv- minute, small, little, कार्यम्- work to be done, duty, obligation- कार्य- (also करणीय, कृत्य & कर्तव्य)- क. वि. धा. सा. वि. of कृ- करोति, कुरुते ८ ग. उ. प. to do & कृतम्- done, performed- कृत- क.भू. धा. वि. of कृ- to do- all in न. लिं. प्र. वि. ए. व., काले- in पु. लिं. स. वि. ए. व. of कालः- time, occasion, period, उपकारताम् & रिक्तताम्- both in स्त्री. लिं. द्वि. वि. ए. व. of उपकारता- sense of gratitude- उपकारः- service, help, favour- ता- suffix implies quality, nature & रिक्तता- a sense of deprivation, wasted effort, wastefulness- रिक्तम्- empty, devoid or deprived of- रिक्त- क. भू. धा. वि. of रिच्- रिणक्ति- रिंक्ते ७ ग. उ. प. to empty, evacuate, एति- वर्त. प्र. पु. ए. व. of इ- to go, attain, excel, महान् (महत्)- great, big & अत्युपकारः- big help, obligation (अति+ उपकारः)- अति- अव्यय- a prefix used with adjctv or adverb implies- very, exceedingly- both in पु. लिं. प्र. वि. ए. व., अकालतः- at an inappropriate time, when the need has lapsed- कालः- time, occasion, न कालः- अकालः- नञ् तत्पुरुष स.- (तः (तस्)- suffix implies: from that, by that- as a substitute for पं. वि.), अपि- also, even, and, तु - but, on the other hand- both अव्ययs

वरं तुङ्गाच्छृङ्गाद्गुरुशिखरिणः क्वापि पुलिने
पतित्वायं कायः कठिनदृषदन्तर्विदलितः।
वरं न्यस्तो हस्तः फणिपतिमुखे तीव्रदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः॥१५॥ --सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्मयम्

क्व अपि गुरुशिखरिणः तुङ्गात् शृङ्गात् अयम् कायः कठिन-दृषद्-अन्तर्-विदलितः पुलिने पतित्वा वरम्, हस्तः फणिपतिमुखे तीव्रदशने न्यस्तः वरम्, वह्नौ पातः वरम्, तद् अपि कृतः शीलविलयः न (वरम्) ॥

It is preferred to get this body fallen from any of the tall, mighty mountain summits and cut into pieces and fallen on a bed of hard rocks or put one's hand into mouth of a deadly King cobra for getting badly bitten or jump into fire, than ever suffer loss of a character.

गुरुशिखरिणः- पु. लिं. ष. वि. ए. व.of गुरुशिखरिन्- a big mountain- गुरु- adjctv- big, mighty, शिखरिन्- mountain- गुरुः शिखरी- वि. पू. प. कर्मधारय स., तुङ्गात् & शृङ्गात्- न. लिं. पं. वि. ए. व.of तुङ्ग- adjctv- tall, high & शृङ्गम्- a peak, summit, पुलिने, फणिपतिमुखे, तीव्रदशने & वह्नौ- all in पु/न. लिं. स. वि. ए. व. of पुलिन- sand bank, bed of rocks, फणिपतिमुख- mouth of lord of snakes- फणिन्- hooded serpent, पतिः- lord, master, मुखम्- mouth face- फणिनाम् पतिः- फणिपतिः & फणिपतेः मुखम्- फणिपतिमुखम्- both- ष. तत्पुरुष स., तीव्रदशन- hard biting- तीव्र- adjctv- severe, intense, sharp, दशन- biting, tooth- तीव्रः दशनः- तीव्रदशनः- वि. पू. प. कर्मधारय स., वह्निः- fire, अयम् (इदम्)- this, कायः- body, कठिनदृषदन्तर्विदलितः- rendered into pieces among hard rocks- कठिन- adjctv- hard, stiff, दृषद्- स्त्री. लिं- rock, stone, अन्तर्- अव्यय- prefix verb regarded as a preposition between, into, inside, अन्तर्विदलितः- rendered or broken in pieces inside- क. भू. धा. वि. of अन्तर्+वि+ दल्- to break or split inside- (दल्- दलति १ ग. प. प. to cleave, crack)- कठिना दृषद्- कठिनदृषद्- वि. पू. प. कर्मधारय स. & कठिनदृषत्सु अन्तर्विदलितः- कठिनदृषदन्तर्विदलितः- स. तत्पुरुष स., न्यस्तः- placed, inserted- न्यस्त- क. भू. धा. वि. of नि+ अस्- to insert, place- (अस्- अस्ति २ ग. प. प. to be), हस्तः- hand, पातः- fall, falling down, कृतः- done, committed- कृत- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, शीलविलयः- total loss of character- शीलम्- character, virtue, conduct विलयः- total destruction, loss- शीलस्य विलयः- शीलविलयः- ष.तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., पतित्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of पत्- पतति १, ग. प. प. to fall, fall down, तद्- that, it- in न. लिं. पु. वि. ए. व., वरम्- preferred to, better than, क्व- where, अपि- even, also, क्व+ अपि- somewhere, anywhere, न- no, not- all अव्ययs

विदैवज्ञं ग्रामं विबुधविधुरां भूपतिसभां
मुखं श्रुत्या हीनं मनुजपतिशून्यं च विषयम्।
अनाचारान्दारानपहरिकथं काव्यमपि च
प्रवक्तृत्वापेतं गुरुमपि सुबुद्धिः परिहरेत्॥१६॥ ---सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्मयम्

सुबुद्धिः विदैवज्ञम् ग्रामं, विबुधविधुराम् भूपतिसभाम्, श्रुत्या हीनम् मुखम्, मनुज-पति-शून्यम् विषयम् च अनाचारान् दारान्, अपहरिकथम् काव्यम् अपि च प्रवक्तृत्वापेतम् गुरुम् अपि परिहरेत्।

A wise man should keep away from a town without an astrologer, a Royal Court without learned men, a person with no knowledge of sacred texts, a country without a ruler, a wife with bad conduct, a poem devoid of divine tales and a teacher with nod capability to teach.

सुबुद्धिः- a good intellect, a wise man- in पु. लिं. प्र. वि. ए. व., विदैवज्ञम्, ग्रामम्, प्रवक्तृत्वापेतम्, गुरुम्, विषयम् & मनुजपतिशून्यम्- all in पु. लिं. द्वि. वि. ए. व. of विदैवज्ञः- दैवम्- destiny, devine- दैवम् जानाति इति- उपपद तत्पुरुष स.- दैवज्ञः- one who is capable of predict future, an astrologer, ग्रामः- village, town, प्रवक्तृत्वापेतः- one without capability to teach- प्रवक्तृ- a teacher, expounder, त्व- suffix implies ability, quality, अपेतः- devoid of, befret of- अपेतः- क. भू. धा. वि. of अप+ इ- to be devoid of, to be contrary- प्रवक्तृत्वात् अपेतः- प्रवक्तृत्वापेतः- पं. तत्पुरुष स., गुरुः- teacher, preceptor, विषयः- place, kingdom & मनुजपतिशून्यः- devoid of a King, Ruler- मनुजः- man, person, पतिः- master, lord, शून्य- devoid of, zero, मनुजानाम् पतिः- मनुजपतिः- ष. तत्पुरुष स. & मनुजपतिना शून्यः- मनुजपतिशून्यः- तृ. तत्पुरुष स., विबुधविधुराम् & भूपतिसभाम्- both in स्त्री. लिं. द्वि. वि. ए. व. of विबुधविधुरा- devoid of learned person- विबुध- wise or learned person, विधुर- adjctv- devoid of, deprived of- विधुराः विबुधाः - वि.उ. प. कर्मधारय स. & भूपतिसभा- a king's court- भूः- land, earth, पतिः- master, lord, सभा- assembly, court- भुवः पतिः- भूपतिः & भूपतेः सभा- भूपतिसभा- both ष. तत्पुरुष स, हीनम् मुखम् च, अनाचारान् & दारान्- both in पु. लिं. द्वि. वि. ब. व. of अनाचारः- आचारः- conduct, behaviour- न आचारः- अनाचारः- नञ् तत्पुरुष स.- one with bad conduct & दारा- wife, अपहरिकथम्- अप- अव्यय- prefix implies: devoid of, bad, हरिः- God, कथा- story, tale, account- हरेः कथा यद् तद्- हरिकथम्- बहुव्रीहि स. & हरिकथम् अपकृत्य- अपहरिकथम्- अव्ययीभाव स. & काव्यम्- poetical composition- both in न. लिं. द्वि. वि. ए. व., श्रुत्या- in स्त्री. लिं. तृ. वि. ए. व. of श्रुतिः- sacred knowledge, holy learning, परिहरेत्- विध्यर्थ प्र. पु. ए. व. of परि+ हृ- to about, shun- (हृ- हरति १ ग. प. प. to take, carry) अपि- even, also, च- and- both अव्ययs

आशया ह्यभिपन्नानामकृत्वाश्रुप्रमार्जनम् ।
राजा वा राजपुत्रो वा भ्रूणहत्यैव युज्यते ॥१७॥ -महाभा- शान्तिपर्व ३६०, -वैदिकवाङ्मयम्

(यदा) राजा वा राजपुत्रः वा, आशया हि अभिपन्नानाम् अश्रुप्रमार्जनम् अकृत्वा (प्रहिनोति -sends away- तदा तेन), भ्रूणहत्या एव युज्यते॥

A King or a Prince, who turns away people in difficulty, who have approached him with hope, without wiping their tears, commits (an equivalent sin of) killing a foetus.

राजा (राजन्)- King, राजपुत्रः- prince- राज्ञः पुत्रः- ष. तत्पुरुष स.- both in पु. लिं. प्र. वि. ए. व., आशया- in स्त्री. लिं. तृ. वि. ए. व. of आशा- hope, expectation, wish, अभिपन्नानाम्- in पु. लिं. ष. वि. ब. व. of अभिपन्नः- one who has approached, fallen in difficulty- अभिपन्न- क. भू. धा. वि. of अभि+ पत्- to approach, withdraw- (पत्- पतति १ ग. प. प. to fall, fall down), अकृत्वा- without doing, not fulfilling- न कृत्वा- अकृत्वा- नञ् तत्पुरुष स.- कृत्वा- पू. का. वा. धा. सा. त्वान्त अव्यय of कृ- करोति, कुरुते ८ ग. उ. प. to do, make, अश्रुप्रमार्जनम्- wiping off tears- अश्रु- न. लिं.- a tear, प्रमार्जनम्- wiping off- (प्र+ मृज्- मार्जति १ ग. प. प. to wipe well)- अश्रुनोः प्रमार्जनम्- ष. तत्पुरुष स.- in न. लिं. द्वि. वि. ए. व., भ्रूणहत्या- killing of a foetus- in स्त्री. लिं. प्र. वि. ए. व., भ्रूणः- embryo, foetus, हत्या- killing, murder- भ्रूणस्य हत्या- ष. तत्पुरुष स., युज्यते- कर्मणि प्रयोग प्र. पु. ए. व. of युज्- युनक्ति युंक्ते ७ ग. उ. प. to use, consider, deploy, appoint, वा-or, and, हि- surely, indeed, एव- just, only- all अव्ययs

इन्दुं निन्दति तस्करो गृहपतिं जारो सुशीलं खलः
साध्वीमप्यसती कुलीनमकुलो जह्यात् जरन्तं युवा।
विद्यावन्तमनक्षरो धनपतिं नीचश्च रूपोज्ज्वलम्
वैरूप्येण हतः प्रबुद्धमबुधो कृष्टं निकृष्टो जनः ॥१८॥ - संस्कृतसाहित्यमसमः संघः

तस्करः इन्दुम्, जारः गृहपतिम्, खलः सुशीलम्, असती साध्वीम् अपि (तथा) अकुलः कुलीनम् निन्दति । युवा जरन्तम्, अनक्षरः विद्यावन्तम्, नीचः धनपतिम् च जह्यात् । रूपोज्ज्वलम् वैरूप्येण हतः (भवति) । (तथा) अबुधः प्रबुद्धम् (जहाति) । निकृष्टः जनः कृष्टम् (निन्दति) ॥

This Subhashit describes the traits among different people.

A thief hates the moon. An adulterer hates a householder. A wicked man hates a person with good character. An unchaste woman is envious of a virtuous lady and a man with poor family background criticises a man of noble birth. A young man may abandon an aging man. An illiterate person may leave a learned man and a mean person may steal from a wealthy person. A splendid beauty becomes ugly (with age). A stupid person may hit an intelligent person. An uncultured person criticizes a refined person.

तस्करः- a thief, खलः- wicked man, जारः- paramour, adulterer, युवा (युवन्)- youth, young man, अकुलः- one from bad family background- कुलम्- family, race- न विद्यते कुलम् यस्य सः- अकुलः- नञ्बहुव्रीहि स. & अनक्षरः- an illiterate- अक्षरम्- a letter, an alphabet- न विद्यते अक्षरम् यस्य सः- अनक्षरः- both- नञ्बहुव्रीव्रीहि स., अबुधः- stupid person- बुधः- aise, learned- न बुधः- नञ् तत्पुरुष स., निकृष्टः- low, despised, vulgar person- नि- अव्यय- used as prefix to implying: lowness, absence, wrong, कृष्टः- refined, ploughed, cultured- क. भू. धा. वि. of कृष्- कृषति -ते ६ ग. उ. प. to plough, conduct, to be expert, जनः- people, नीचः- low, mean, vile person & हतः- one who is stricken, killed- all in पु. लिं, प्र. वि. ए. व., इन्दुम्, गृहपतिम्, विद्यावन्तम्, धनपतिम्, सुशीलम्, प्रबुद्धम्, कृष्टम्, जरन्तम्, रूपोज्ज्वलम् & कुलीनम्- all in पु. लिं, द्वि. वि. ए. व. of इन्दुः- the Moon, गृहपतिः- a householder- गृहम्- house, पतिः-lord, master- गृहस्य पतिः- ष. तत्पुरुष स., विद्यावत्- learned, educated- विद्या- knowledge, वत्- suffix implies: quality, possession, धनपतिः- wealthy man- धनम्- wealth, money- धनस्य पतिः- ष. तत्पुरुष स., सुशीलः- refined, cultured person, प्रबुद्धः- matured, enlightened person, कृष्टः- (see above), जरन्- one who is aging- वर्त. का. वा. धा. सा. वि. of जृ(दीर्घ)- १, ४, ९ प. प. & १० उ. प. to grow old, wear out, रूपोज्ज्वलः- one with splendid beauty- रूपम्- beauty, figure, उज्ज्वलः- splendid, shining- यस्य रुपम् उज्ज्वलम् अस्ति सः- बहुव्रीहि स. & कुलीनः- one from good family, असती- bad woman- सती- a noble lady- न सती- नञ् तत्पुरुष स.- in स्त्री. लिं, प्र. वि. ए. व., साध्वीम्- in स्त्री. लिं, द्वि. वि. ए. व. of साध्वी-noble lady, वैरूप्येण- न. लिं. तृ. वि. ए. व. of वैरूप्यम्- deformity, ugliness, जह्यात्- विध्यर्थ प्र. पु. ए. व. of हा- जहाति २ ग. प. प. to leave, abandon, निन्दति- वर्त. प्र. पु. ए. व. of निन्द्- १ ग. प. प. to blame censure, अपि even, also, च- and both अव्ययs,

न कालस्यास्ति बन्धुत्वं न हेतुर्न पराक्रमः ।
न मित्रज्ञातिसम्बन्धः कारणं नात्मनो वशः ॥१९॥-रामायण किष्किन्धा. २५.७, -वैदिकवाङ्मयम्

कालस्य न बन्धुत्वम् न हेतुः न मित्रज्ञातिसम्बन्धः अस्ति । आत्मनः वशः न कारणम् (वा) न पराक्रमः (वर्तते) ॥

(Said by Rama to Sugreeva, while consoling him on Vali's death)

For the destiny, there is neither relationship nor any specific purpose. It has neither connection to friends nor to the community. It is not under one's control nor can anyone overpower it.

कालस्य & आत्मनः- both in पु. लिं. ष. वि. ए. व. of कालः- God of Death, fate, destiny & आत्मन्- self, one's own, oneself, बन्धुत्वम्- relationship, kinsmanship & कारणम्- reason, cause- both in न. लिं. प्र.

वि. ए. व., हेतुः- purpose, reason, object, cause, पराक्रमः- endeavour, prowess, marching against, attack, मित्रज्ञातिसम्बन्धः- connection of friends or relatives- मित्रम्- न. लिं.- a friend, ज्ञातिः- पु. लिं- a relative, kinsman, सम्बन्धः- connection, association, relation- मित्रम् च ज्ञातिः च- मित्रज्ञातिः- द्वंद्व स. & मित्रज्ञातेः सम्बन्धः- ष. तत्पुरुष स. & वशः- control, mastership- all in पु. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, न- no, not- अव्यय

ययोश्चित्तेन वा चित्तं निभृतं निभृतेन वा।
समेति प्रज्ञया प्रज्ञा तयोर्मैत्री न जीर्यति ॥२०॥ -महाभा उद्योग ३९.४७, - सुधर्मादिनपत्रिका

ययोः चित्तम् चित्तेन, निभृतम् निभृतेन वा, प्रज्ञा प्रज्ञया वा समेति, तयोः मैत्री न जीर्यति॥

A friendship between two people who think alike, who keep the same secrets and who are on the same intellectual level, never decays.

ययोः- between whose & तयोः- between them- पु. लिं. ष. वि. द्वि. व. of यद्- who & तद्- he, चित्तम् & चित्तेन- न. लिं. प्र. वि. & तृ. वि. ए. व. of चित्त- mind, heart, thought, निभृतम् & निभृतेन- न. लिं. प्र. वि. & तृ. वि. ए. व. of निभृत- a secret, confidential, unperceived- क. भू. धा. वि. of नि+ भृ- to hold firmly, to deposit, to conceal, प्रज्ञा & प्रज्ञया- स्त्री. लिं. प्र. वि. & तृ. वि. ए. व. of प्रज्ञा- intelligence, wisdom, understanding, समेति & जीर्यति- वर्त. प्र. पु. ए. व. of सं+ इ- to meet, come together, to match (इ- एति २ ग. प. प. to go) & जॄ(दीर्घ)- ४ ग. प. प. to grow old, to wear out, to wither, perish, मैत्री- friendship- स्त्री. लिं. प्र. वि. ए. व., न- no, not, वा- or- both अव्ययs

सुव्याहृतानि धीराणां फलतः परिचिन्त्य यः।
अध्यवस्यति कार्येषु चिरं यशसि तिष्ठति ॥२१॥ -महाभा उद्योग ३९.३३, -सुधर्मादिनपत्रिका

यः धीराणाम् सुव्याहृतानि (वचनानि) परिचिन्त्य, फलतः कार्येषु अध्यवस्यति (सः) चिरम् यशसि तिष्ठति॥

One, who thoroughly considers the good advice of wise men and consequently adopts them in his works, enjoys success for a long time.

यः (यद्)-who- in पु. लिं. प्र. वि. ए. व., धीराणाम्- in पु. लिं. ष. वि. ब. व. of धीरः- brave, resolute, self-possessed, of firm resolve, सुव्याहृतानि- in न. लिं. द्वि. वि. ब. व. of सुव्याहृतम्- very well said, narrated- व्याहृत- क. भू. धा. वि. of व्या+ हृ- to say, narrate -(हृ- हरति- ते १ ग. उ. प. to convey, take, lead)- सु- अव्यय- a prefix implies: very well, good, परिचिन्त्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of परि+ चिन्त्- to judge thoroughly, consider well- (चिन्त्- चिन्तयति- ते १० ग. उ. प. to think, consider, ponder over), कार्येषु- in न. लिं. स. वि. ब. व. of कार्यम्- work, duty, assignment- कार्य (also करणीय, कर्तव्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make), यशसि- in न. लिं. स. वि. ए. व. of यशस्- fame, glory, renown, तिष्ठति- वर्त. प्र. पु. ए. व. of स्था- १ ग. प. प. to stay, stand, remain, अध्यवस्यति- वर्त. प्र. पु. ए. व. of अधि + अव + सो- consider, ascertain, determine, accomplish, attempt, undertake, make up one's mind- (सो- स्यति- ४ ग. प.प. finish, kill, destroy), चिरम्- used adverbially in the sense of: for a long time, finally, at last, फलतः (फलतस्)- as a consequence, virtually, consequently- अव्यय.

विद्यातीर्थे जगति विबुधाः साधवः सत्यतीर्थे
गङ्गातीर्थे मलिनमनसो योगिनो ध्यानतीर्थे।

धारातीर्थे धरणिपतयो दानतीर्थे धनाढ्या
लज्जातीर्थे कुलयुवतयः पातकं क्षालयन्ति॥ २२॥ ---सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम् संघ

जगति विबुधाः विद्यातीर्थे, साधवः सत्यतीर्थे, मलिनमनसः गङ्गातीर्थे, योगिनः ध्यानतीर्थे, धरणिपतयः धारातीर्थे, धनाढ्याः दानतीर्थे (तथा) कुलयुवतयः लज्जातीर्थे (आत्मनः) पातकम् क्षालयन्ति॥

In this world, where do various people cleanse themselves of their own wrong doings? - Learned men do it in the field of knowledge, pious people in the world of truth, dirty minded on the banks of river Ganges, ascetics in the field of meditation, Kings on the battle field, rich people in the field of charity and ladies of high descent in world of modesty.

जगति- न. लिं. स. वि. ए. व. of जगत्- world, earth, विबुधाः, साधवः, मलिनमनसः, योगिनः, धरणिपतयः & धनाढ्याः- all in पु. लिं. प्र. वि. ब. व. of विबुधः- wise or learned man, साधुः- ascetic, saintly person, मलिनमनस्- one with a ticket mind, a sinner, मलिन- adjctv- dirty, sinful, impure, मनस्- न. लिं.- mind, heart, thought- मलिनम् मनः यस्य सः- मलिनमनस्- बहुव्रीहि स., योगिन्- a devotee, a contemplative saint, धरणिपतिः- a King- धरणिः/धरणी- earth, पतिः- husband, master- धरण्याः पतिः- धरणिपतिः- ष. तत्पुरुष स. & धनाढ्याः- धनम्- wealth, money, property, आढ्यः- rich, abounding, possessing- धनेन आढ्यः यः सः- बहुव्रीहि स., कुलयुवतयः- in स्त्री. लिं. प्र. वि. ब. व. of कुलयुवतिः- a woman of high descent, well-born woman- कुलम्- good family, race- कुलीन- adjctv- of high descent, well-born- युवतिः/युवती- a young woman- कुलीना युवतिः- वि. पू. प. कर्मधारय स., विद्यातीर्थे- in the field of knowledge- विद्या- knowledge, education, तीर्थ- sacred place- विद्यायाः तीर्थम्, गङ्गातीर्थम्- sacred banks of Ganga- गङ्गायाः तीर्थम् & धारातीर्थे- in the battle field-, ष. तत्पुरुष स., सत्यतीर्थे- in the world of truth- सत्यम्- truth- सत्यः एव तीर्थम्, ध्यानतीर्थे- in the field of meditation- धारा- front line of an army- धारायाः तीर्थम्- ष. तत्पुरुष स.(NB: though धारा- has various meanings, in this context above is to be considered), ध्यानम्- meditation, contemplation- ध्यानम् एव तीर्थम्, लज्जातीर्थे- in world of modesty, dignity- लज्जा- shame, modesty- लज्जा एव तीर्थम् & दानतीर्थे- in the field of charity- दानम्- charity, giving- दानम् एव तीर्थम्- all उ. पू. प. कर्मधारय स.- all above न. लिं. स. वि. ए. व., पातकम्- पु/न. लिं. द्वि. वि. ए. व. of पातकः/कम्-sin, crime, क्षालयन्ति- वर्त. प्र. पु. ब. व. of क्षल्- क्षालयति-ते १० ग. उ. प. to wash off, purify, cleanse

दृढः प्रेमा भग्नः सदसिरिव सन्धिं न भजते
भजेतापि प्रायः स्खलति खलु यत्नैरपि धृतः।
स्खलेन्नो चेत्साम्यं भजति न भजेद्वा न भवति
च्युताशङ्कश्चेत्स्यात्स्मृतिमुपगतस्तु व्यथयति॥२३॥---सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम्

दृढः प्रेमा भग्नः सत्, असिः इव, सन्धिम् न भजते। भजेत अपि, यत्नैः खलु धृतः प्रायः स्खलति अपि। स्खलेत् नो चेत्, (सः) साम्यम् न भजति ।भजेत् वा, च्युताशङ्कः न भवति। (च्युताशङ्कः) स्यात् चेत्, (सः) स्मृतिम् उपगतः तु व्यथयति॥

A strong love, once shattered, like a (broken) sword, cannot be repaired. Even if it is repaired, it breaks again even with great efforts. Even if it is not broken, it does not achieve prior level of intactness. If one manages to bring it to the same level, it is still not free of doubts. Even if it is doubt free, whenever one thinks about this past break, it really makes one sad.

दृढः- firm, strong unswering प्रेमा-(प्रेमन्)- love, affection, भग्नः- broken, shattered- भग्न- क. भू. धा. वि. of- भञ्ज्- भनक्ति ७ ग. प. प. to break, tear down, shatter, सत्- being the case, situation- कर्तरि वर्त.

का. वा. धा. सा. वि. of अस्- अस्ति २ ग. प. प. to be, to exist, असिः- sword, च्युताशङ्कः- one who is free from all doubts- च्युत- come out of, free of- क. भू. धा. वि. of च्युत्- च्योतति १ ग. प. प. to slip, fall down, आशङ्का- स्त्री. लिं.- apprehension, uncertainty, fear- च्युता आशङ्का यस्य सः- च्युताशङ्कः- बहुव्रीही स., धृतः- one that is held- धृत- क. भू. धा. वि. of- धृ- धरति १ ग. प. प. उपगतः- occurred, got, past- उपगत- क. भू. धा. वि. of उप+ गम्- to approach, come (गच्छति १ ग. प. प. to go) & धारयति-ते १० ग. उ. प.- hold, bear, carry- all in पु. लिं. प्र. वि. ए. व., सन्धिम् & साम्यम्- in पु. लिं. द्वि. वि. ए. व. of सन्धिः- union, friendship, treaty of peace & साम्यः- sameness, equality, evenness, भजति- भजते- वर्त. प्र. पु. ए. व. & भजेत्- भजेत- विध्यर्थ- प्र. पु. ए. व. of भज्- १ ग. उ. प. to share, receive, accept resort to, स्खलति- वर्त. & स्खलेत्- विध्यर्थ- प्र. पु. ए. व. of स्खल्- १ ग. प. प. to stumble, fall down, slip, shake, fluctuate, व्यथयति- प्रयोजक वर्त. प्र. पु. ए. व. of व्यथ्- व्यथते १ ग. आ. प. to be sorry, pained, afflicted, agitated, भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, यत्नैः- in पु/न. लिं. तृ. वि. ब. व. of यत्न- effort, attempt, exertion, स्यात्- विध्यर्थ- प्र. पु. ए. व. of अस्- see above, स्मृतिम्- in स्त्री. लिं. द्वि. वि. ए. व. of स्मृति- recollection, memory, इव- like, similar to, न- no, not, नो (न+ उ)- no, not, चेत्- if, provided that, अपि- even, also, वा- or, तु- but, on the other hand, खलु- indeed, surely & प्रायः (प्रायस्)- mostly generally, probably-all अव्ययs

आपदां कथितः पन्था इन्द्रियाणामसंयमः ।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम् ॥२४॥ - हितोपदेशे १.३०, -सुधर्मादिनपत्रिका

इन्द्रियाणाम् असंयमः आपदाम् पन्थाः कथितः (अस्ति)। तज्जयः सम्पदाम् मार्गः (भविष्यति) । (भवता) येन इष्टम् तेन गम्यताम्॥

Having no control over one's sense organs is said to be the roads leading up to all miseries. A victory over them paves way for the prosperity. You may go whichever way you desire to go.

इन्द्रियाणाम्- न. लिं. ष. वि. ब. व. of इन्द्रियम्- an organ of sense, असंयमः- not having control, check- संयमः- control, restraint, check- न संयमः- असंयमः- नञ् तत्पुरुष स., कथितः- told, said- क. भू. धा. वि. of कथ्- कथयति- ते १० ग. उ. प. to tell, declare, narrate, पन्थाः (पथिन्) & मार्गः- a way, a road, manner of action & तज्जयः- a victory over that- तद्- that, it, जयः- victory, winning- तस्य जयः- ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., आपदाम् & सम्पदाम्- both in स्त्री. लिं. ष. वि. ब. व. of आपद्- calamity, misfortune, danger & सम्पद्- wealth, riches, prosperity, affluence, येन & तेन- पु/न. लिं. तृ. वि. ए. व. of यद्- who & तद्- that, it, he, इष्टम्- desired, fancied, liked- in न. लिं. प्र. वि. ए. व.- इष्ट- क. भू. धा. वि. of इष्- इच्छति ६ ग. प. प. to wish, desire, गम्यताम्- कर्मणि प्रयोग आज्ञार्थ प्र. पु. ए. व. of गम्- गच्छति १ ग. प. प. to go, proceed.

न रम्यं नारम्यं प्रकृतिगुणतो वस्तु किमपि
प्रियत्वं यत्र स्यादितरदपि तद्ग्राहकवशात्।
रथाङ्गाह्वानानां भवति विधुरङ्गारशकटी
पटीराम्भःकुम्भः स भवति चकोरीनयनयोः॥२५॥ ---सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्ग्यम्

किम् अपि वस्तु न रम्यम् (वा) न अरम्यम् प्रकृति- गुणतः (भवति)। इतरत्, यत्र प्रियत्वम् स्यात्, ग्राहकवशात् तद् अपि (न रम्यम् न अरम्यम् भवति)। विधुः रथाङ्गाह्वानानाम् अङ्गार- शकटी भवति, (परन्तु) चकोरी-नयनयोः सः पटीराम्भः- कुम्भः भवति॥

Whether anything is delightful or not delightful is not based on its inherent properties. The affinity or dislike towards it basically depends on the person who deals with it. The Moon appears as a carriage of burning coal to a male Chakrawak bird while the very same Moon is a pot full of cool sandalwood- water in the eyes of a Chakor bird..

Chakrawak bird is afraid of getting separated from its beloved at night.So, it hates arrival of the night and the moon. On the other hand, Chakor bird is said to feed itself on rays of the Moon.

रम्यम्- delightful, amusing, playful, rejoiceful- रम्य- क. वि. धा. सा. वि. of रम्- रमते १ ग. आ. प. to be delighted, to rejoice, to be pleased with, न रम्यम्- अरम्यम्- नञ् तत्पुरुष स., किम्- which, what- (किम् + अपि)- anything, something, वस्तु- article, matter, object, a thing, तद्- that, it, इतरत्- another, the other & प्रियत्वम्- affection, love, dearness- all in न. लिं. प्र. वि. ए. व., प्रकृतिगुणतः- by inherent property, nature, quality- प्रकृतिः- inherent nature, property, गुणः- quality, virtue- प्रकृतेः गुणः- प्रकृतिगुण- ष. तत्पुरुष स.- तः (तस्)- suffix implies; by virtue- generally used as substitute for पं. वि., स्यात्- विध्यर्थ प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, ग्राहकवशात्- in पु/न. लिं. पं. वि. ए. व. ग्राहकवश- ग्राहक- taker, receiver, dealer, वश- subject to, influenced by, control of- ग्राहकस्य वशः- ष. तत्पुरुष स., विधुः- the Moon, सः (तद्)- he & पटीराम्भःकुम्भः- a pot full of sandalwood- water- पटीरः- पु. लिं- sandalwood, अम्भस्- न. लिं- water, कुम्भः- पु. लिं.- a pot- पटीरवासितम् अम्भः- पटीराम्भः- उत्तरपदलोपी कर्मधारय स. & पटीराम्भसः कुम्भः- पटीराम्भःकुम्भः- ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., रथाङ्गाह्वानानाम्- in पु. लिं. ष. वि. ब. व. of रथाङ्गाह्वान- a ruddy goose (चक्रवाक- the male bird is said by poets to be separated from the female at night and to be united at sunrise), अङ्गारशकटी- a holder of burning coal, अङ्गार- burning coal, शकटी- स्त्री. लिं- a toy carriage, small holder- अङ्गारस्य शकटी- ष. तत्पुरुष स.- in स्त्री. लिं., प्र. वि. ए. व., भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, चकोरीनयनयोः- in न. लिं. ष. वि. द्वि. व. of चकोरीनयनम्- an eye of a Chakor bird (said to feed on the Moon beams), न-no, not, अपि- even also, यत्र- where, in which case- all अव्ययs

अनालोक्य व्ययं कर्ता ह्यनाथः कलहप्रियः ।
आतुरः सर्वक्षेत्रेषु नरः शीघ्रं विनश्यति ॥२६॥ -चाणक्यनीति १२.१९, संस्कृतसाहित्यमसमः

अनालोक्य व्ययम् कर्ता, अनाथः हि कलहप्रियः, सर्वक्षेत्रेषु आतुरः नरः शीघ्रम् विनश्यति॥

A person, who spends without thinking, who loves picking up quarrels, who has no protector or who is impatient in every field, soon faces his own ruin.

अनालोक्य- without perceiving, thoughtlessly- पू. का वा ल्यबन्त धा. सा. अव्यय of आ+ लोक्- to perceive, behold, see- (लोक्- लोकते १ ग. आ. प. to see, view)- न आलोक्य- अनालोक्य- नञ् तत्पुरुष स., व्ययम्- पु. लिं. द्वि. वि. ए. व. of व्ययः- expenditure, spending- (व्यय्- व्यययति- ते १० ग. उ. प. to expend, give away), कर्ता (कतृ)- doer, indulger, maker- (कृ-करोति कुरुते ८ ग. उ. प. to do), अनाथः- one without support, orphan- नाथः- master, protector, supporter- न नाथः यस्य सः- अनाथः नञ् बहुव्रीहि स., कलहप्रियः- quarrel monger, fond of quarrels- कलहः- strife, quarrel, प्रिय- dear, desiring, liking- कलहः प्रियः यस्य सः- बहुव्रीहि., आतुरः- over anxious, impatient & नरः- man, person- all in पु. लिं. प्र. वि. ए. व., सर्वक्षेत्रेषु- न. लिं. स. वि. ब. व. of सर्वक्षेत्रम्- all fields, ventures- सर्वम्- all, entire, क्षेत्रम्- field, area- सर्वम् क्षेत्रम्- वि. पू. प. कर्मधारय स., विनश्यति- वर्त. प्र. पु. ए. व. of वि+ नश्- to get destroyed completely-

(नश्- नश्यति ४ ग. प. प. to get destroyed, to be lost), हि- indeed, surely & शीघ्रम्- soon, in no time- both अव्ययs

दूतो न सञ्चरति खे न चलेच्च वार्ता
पूर्वं न जल्पितमिदं न च सङ्गमोऽस्ति।
व्योम्नि स्थितं रविशशिग्रहणं प्रशस्तं
जानाति यो द्विजवरः स कथं न विद्वान्॥-- चाणक्यनीतिदर्पण अ. ९ श्लो. ५

खे दूतः न सञ्चरति, पूर्वं वार्ता न चलेत् च इदं न जल्पितं, सङ्गमः न च अस्ति। यः द्विजवरः व्योम्नि स्थितं रविशशिग्रहणं प्रशस्तं जानाति, सः कथं न विद्वान् (स्यात्)?

An emissary is not roaming around the sky. There is no news, nor is anyone talking about it. There is no contact with anyone. Is it not that the highly educated person very brilliant, who predicts the eclipses of the Sun or the Moon up in the sky?

This Subhāṣita *suggests that even before 300 BCE, the astronomical science was well developed in India to predict the eclipses of the Sun and the Moon.*

खे & व्योम्नि- both in न. लिं. स. वि. ए. व. of खम् & व्योमन्- sky, दूतः- messanger, envoy, सङ्गमः- meeting, union, association, यः (यद्)- who, सः (तद्)- he, द्विजवरः- the best among the brahmin or learned class- द्विजः- normally a brahmin, a member of priestly class, वरः- best excellent, finest- द्विजेषु वरः- द्विजवरः- स. तत्पुरुष स., विद्वान्-(विद्वस्)- a learned person, intellectual, scholar- all in पु. लिं. प्र. वि. ए. व., सञ्चरति, जानाति & अस्ति- all in वर्त. प्र. पु. ए. व. of सं+ चर्- to move about, roam- (चर्- चरति १ ग. प. प. to walk, go, roam, ज्ञा- जानाति, जानीते- ९ ग. उ. प. to know, understand & अस्- २ ग. प. प. to be, to exist, वार्ता- information, news- in स्त्री. लिं. प्र. वि. ए. व., चलेत्- विध्यर्थ प्र. पु. ए. व. of चल्- चलति १ ग. प. प. to go, move, stir, set out, इदम्- this, it & जल्पितम्- said, spoken, conversed- जल्पित- क. भू. धा. वि. of जल्प्- जल्पति १ ग. प. प. to speak, say, utter- both in न. लिं. प्र. वि. ए. व., स्थितम्- located, standing, staying- स्थित- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stand, stay, be located, रविशशिग्रहणम्- eclipse of the Sun and Moon, रविः- sun, शाशिन्- moon, ग्रहणम्- seizure, eclipse, रविः च शशि च- रविशशिनौ- द्वंद्व स.& रविशशिनोः ग्रहणम्- रविशशिग्रहणम्- ष. तत्पुरुष स. & प्रशस्तम्- commendable, praiseworthy- प्रशस्त- क. भू. धा. वि. of प्र+ शंस्- to praise, extol, command (शंस्- शंसति to praise, extol)- all in न. लिं. द्वि. वि. ए. व., पूर्वम्- before hand, previously, formerly, च- and, कथम्- how, what way, न- no, not- all अव्यय

शास्त्रे प्रतिष्ठा सहजश्च बोधः
प्रागल्भ्यमभ्यस्तगुणा च वाणी।
कालानुरोधः प्रतिभानवत्वम्
एते गुणाः कामदुधाः क्रियासु ॥२८॥ -भवभूति- मालतीमाधव,३.११

शास्त्रे प्रतिष्ठा, सहजः च बोधः, प्रागल्भ्यम्, अभ्यस्तगुणा वाणी च, कालानुरोधः, प्रतिभानवत्त्वम् एते गुणाः क्रियासु कामदुधाः (भवन्ति) ॥

Having knowledge of scriptures (science), inborn intelligence, high level of confidence, well refined speech, proper time- management and innovative concepts enable one to accomplish all desired objectives.

क्रियासु- स्त्री. लिं. स. वि. ब. व. of क्रिया- action, deed, performance, business, शास्त्रे- न. लिं. स. वि. ए. व. of शास्त्रम्- scripture, science, knowledge, theory, प्रतिष्ठा- pre-eminence, high authority, accomplishment, वाणी- speech, language, power of speech, अभ्यस्तगुणा- well-studied quality, nature, अभ्यस्त- studied, accustomed, practiced- क. भू. धा. वि. of अभि+ अस्- to study, practice, exercise- (अस्- अस्ति २ ग. प. प. to be, to exist, गुणः- quality, virtue, nature- अभ्यस्ता गुणा - अभ्यस्तगुणा- कर्मधारय स.- all in स्त्री. लिं. प्र. वि. ए. व., सहजः- natural, inherent, inborn, बोधः- perception, knowledge, intellect & कालानुरोधः- proper time- management- कालः- time, occasion, period, अनुरोधः- regulation, control, management- (रोधः- stoppage, prevention)- कालस्य अनुरोधः- कालानुरोधः- ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., प्रागल्भ्यम्- confidence, proficiency, skill & प्रतिभानवत्त्वम्- innovative conception- प्रतिभा- conception, vivid imagination- नवत्त्वम्- novelty- नव- new, fresh, modern, त्त्वम्- suffix implies quality, nature- प्रतिभायाः नवत्त्वम्- प्रतिभानवत्त्वम्- ष. तत्पुरुष स.- both in न. लिं. प्र. वि. ए. व., एते, गुणाः & कामदुधाः- all in पु. लिं. प्र. वि. ब. व. of एतद्- this, it, गुणः- quality, virtue & कामदुह्- one which grant what is desired- कामम्- object of desire- कामम् दोहयति इति- कामदुह्- उपपद तत्पुरुष स.

कलासीमा काव्यं सकलगुणसीमा वितरणं
भये सीमा मृत्युः सकलसुखसीमा सुवदना।
तपःसीमा मुक्तिः सकलकृतिसीमा श्रितभृतिः
प्रिये सीमाह्लादः श्रवणसुखसीमा हरिकथा ॥२९॥ -सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम् संघ

कला-सीमा काव्यम्, सकल-गुण-सीमा वितरणम्, भये सीमा मृत्युः, सकल-सुख-सीमा सुवदना, तपःसीमा मुक्तिः, सकल-कृति-सीमा श्रित-भृतिः, प्रिये सीमा- आह्लादः (तथा) श्रवण-सुख-सीमा हरिकथा (भवति)॥

The ultimate art is a beautiful poem. The highest of all virtues is passing them on to others. Fear culminates in death. The climax of all happiness is a company of a beautiful woman. The goal of penance is the liberation (Moksha). The ultimate deed is protecting a refuge. The final objective all desirable things is pleasure. The highest joy is listening to the stories of God Almighty.

सीमा- स्त्री. लिं.- limit, boundary, climax, highest point, कलासीमा- climax of practicing art- कला- any form of practical art- (64 such arts like music, dancing etc listed)- कलायाः सीमा- कलासीमा, सकलगुणसीमा- limit of all virtues or good qualities- सकल- adjctv- all, entire, गुण- virtue, quality- सकलाः गुणाः- सकलगुणाः -वि. पू. प. कर्मधारय स. & सकलगुणानाम् सीमा- सकलगुणसीमा, सकलसुखसीमा- climax of all happiness- सकलम् सुखम्- सकलसुखम्- वि. पू. प. कर्मधारय स. & सकलसुखानाम् सीमा, तपःसीमा- the goal of all penances- तपस्- न. लिं.- penance, austerity, self-esteem denial- तपसः सीमा, सकलकृतिसीमा- fulfillment of all creations- कृति- स्त्री. लिं- creation, deed, work- सकलाः कृतयः- सकलकृतयः- वि. पू. प. कर्मधारय स. & सकलकृतीनाम् सीमा, श्रवणसुखसीमा- pleasures of all listening- श्रवणम्- hearing, सुखम्- joy, happiness- श्रवणस्य सुखम् & श्रवणसुखस्य सीमा- all above ष. तत्पुरुष स., काव्यम्- poetic composition, literally work, वितरणम्- distribution, spread, propagation, भये & प्रिये- both in स. वि. ए. व. of भयम्- न. लिं- fear, dread, fright & प्रिय- adjctv- beloved, desirable, मृत्युः- death, God of death & आह्लादः- pleasure, delight, joy- both in पु. लि. प्र. वि. ए. व., सुवदना- one with

beautiful face- वदनम्- face, look- सुभगम् वदनम् यस्याः सा- सुवदना- बहुव्रीहि स., मुक्तिः- liberation, deliverance, beatitude, श्रितभृतिः- protecting the one who approached for refuge- श्रित- approached for refuge, protection- क. भू. धा. वि. of श्रि- श्रयति- ते १ ग. उ. प. to approach, honour, भृतिः- स्त्री. लिं- upholding, maintenance- श्रितस्य भृतिः- ष. तत्पुरुष स. & हरिकथा- हरिः- God, lord Vishnu, कथा- narration, story- हरेः कथा- ष. तत्पुरुष स. -all in स्त्री. लि. प्र. वि. ए. व.

सरसि बहुशस्ताराच्छाये क्षणात्परिवञ्चितः
कुमुदविटपान्वेषी हंसो निशासु विचक्षणः।
न दशति पुनस्ताराशङ्की दिवापि सितोत्पलं
कुहकचकितो लोकः सत्येऽप्यपायमपेक्षते॥३०॥ --सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम्

निशासु कुमुदविटपान्वेषी हंसः सरसि बहुशः ताराच्छाये क्षणात् परिवञ्चितः भवति। विचक्षणः, पुनः दिवा अपि, ताराशङ्की, सितोत्पलम् न दशति। कुहकचकितः लोकः सत्ये अपि अपायम् अपेक्षते॥

At night, in search of sprouts of white lotus in lakes, a swan gets instantly fooled after looking at reflection of stars. Now being wise and cautious, even during day, suspecting of stars, it does not bite at real white lotus. People once fooled by fraud, expect some danger even from real thing.

निशासु- स्त्री. लिं. स. वि. ब. व. of निशा-night, कुमुदविटपान्वेषी- one in search of sprouts of lotus- कुमुदः- white lotus (water-lily) said to open at moon-rise, विटपः- bush, sprout, अन्वेषी (अन्वेषिन्)- looking or searching after (अनु+ एष्- अनुवेषति-ते to hasten towards- एष्- ऐषति- ते १ ग. उ. प. to go, approach)- कुमुदस्य विटपः- कुमुदविटपः- ष. तत्पुरुष स. & कुमुदविटपस्य अन्वेषी - कुमुदविटपान्वेषिन्- ष. तत्पुरुष स ., हंसः- swan, परिवञ्चितः- badly cheated- परिवञ्चित- क. भू. धा. वि. of परि+ वञ्च्- to badly cheat- (वञ्च्- वञ्चित- १ ग. प. प. to cheat, deceive), ताराशङ्की- suspecting of stars- तारा- a star, planet, शङ्की (शङ्किन्)- suspecting, doubting (शङ्क्- शङ्कते १ ग. आ. प. to doubt, , hesitate)- ताराणां शङ्की - ताराशङ्किन्- ष. तत्पुरुष स. कुहकचकितः- कुहकः- a cheat, rogue, चकित- adjctv- frightened, startled, fooled- कुहकेन चकितः- तृ. तत्पुरुष स., लोकः- person, people & विचक्षणः- wise, clever, careful- all in पु. लिं. प्र. वि. ए. व., सरसि & सत्ये -both in न. लिं. स. वि. ए. व. of सरस्- lake, pond & सत्यम्- truth, real, ताराच्छाये- in स्त्री. लिं. स. वि. ए. व. of ताराच्छाया- a reflection of stars- तारा- a star, planet, छाया- shadow, reflection- ताराणाम् छाया- ताराच्छाया- ष. तत्पुरुष स., क्षणात्- in पु/न. लिं. पं. वि. ए. व. of, क्षण- an instant, moment, सितोत्पलम्- white lotus- सित- white, उत्पलम्- lotus- सितम् उत्पलम्- सितोत्पलम्- वि. पू. प. कर्मधारय स. & अपायम्- danger, mishap- both in न. लिं. द्वि. वि. ए. व., दशति & अपेक्षते- both वर्त. प्र. पु. ए. व. of दंश्- १ ग. प. प. to bite, sting & अप+ ईक्ष्- to await, expect, look for- (ईक्ष्- ईक्षते १ ग. आ. प. to see, perceive), बहुशः (बहुशस्)- mostly, probably, possibly, न- no, not, अपि- even, also, पुनः (पुनर्)- again, once more & दिवा- by day, at day time- allअव्ययs

मधुकरगणश्चूतं त्यक्त्वा गतो नवमल्लिकां
पुनरपि गतो रक्ताशोकं कदम्बवनं ततः।
तदपि सुचिरं स्थित्वा तेभ्यः प्रयाति सरोरुहं
परिचितजनद्वेषी लोको नवं नवमीहते॥३१॥ -सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम्

मधुकरगणः चूतम् त्यक्त्वा नवमल्लिकाम् गतः। पुनः अपि ततः रक्ताशोकम् कदम्बवनम् गतः। तद् अपि सुचिरम् स्थित्वा तेभ्यः प्रयाति सरोरुहम्। परिचितजनद्वेषी लोकः नवम् नवम् ईहते॥

A group of honeybees, after leaving a mango grove goes to freshly blossomed jasmines. From there again it goes to red-blossom of a cluster of Ashoka trees. After staying there for a long time, it goes away to a lotus (pond). People who have contempt for their familiar people seek out newer and newer relations.

मधुकरगणः- group of honeybees- मधु- honey- न. लिं.- मधु करोति इति- मधुकरः- honeybee- उपपद तत्पुरुष स., गणः- पु. लिं- group, collection- मधुकरणाम् गणः- ष. तत्पुरुष स., गतः- gone, left- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go, परिचितजनद्वेषी- one who has contempt for known people, परिचित- familiar, intimate- क. भू. धा. वि. of परि+ चि- to get to know, practice- (चि- चिनोति- चिनुते ५ ग. उ. प. to collect, pick), जनः- people, person- परिचितः जनः- वि. पू. प. कर्मधारय स. & परिचितजनान् द्वेष्टि इति- परिचितजनद्वेषिन्- उपपद तत्पुरुष स. & लोकः- people, person--all in पु. लिं. प्र. वि. ए. व., चूतम्, नवम्, रक्ताशोकम् & सरोरुहम्- all in पु. लिं. द्वि. वि. ए. व. of चूतः- a mango tree, नवः/नवम्- adjctv- new, fresh, रक्ताशोकः- red (flowered) Ashok tree- रक्त- adjctv- red, अशोकः- a tree having red flowers- रक्तः अशोकः- वि. पू. प. कर्मधारय स. & सरोरुहः- lotus, water-lily- सरम्- न. लिं.- a pond, सरे रोहति इति- सरोरुहः उपपद तत्पुरुष स., त्यक्त्वा & स्थित्वा- both पू. का. वा. त्वान्त धा. सा. अव्यय of त्यज्- त्यजति १ ग. प. प. to leave abandon & स्था- तिष्ठति १ ग. प. प. to stay, await, stand, नवमल्लिकाम्- in स्त्री. लिं. द्वि. वि. ए. व. of नवमल्लिका- नव- adjctv- new, fresh, मल्लिका- jasmine- नवा मल्लिका- वि. पू. प. कर्मधारय स., कदम्बवनम्- a cluster of Kadamba trees- कदम्बः- a kind of tree (said to blossom at roaring of thunder-clouds), वनम्- न. लिं- a cluster of trees, forest- कदम्बस्य वनम्- ष. तत्पुरुष स. &तद्- that, it- both in न. लिं. द्वि. वि. ए. व., तेभ्यः- पु/न. लिं. पं. वि. ए. व. of तद्- that, it, प्रयाति- goes away & ईहते- both in वर्त. प्र. पु. ए. व. of प्र+ या- to set out- (या- याति २ ग. प. प. to go, move) & ईह्- १ ग. आ. प. to strive for, attempt, desire, पुनः (पुनर्)- again, once more, अपि- also, even, ततः (ततस्)- from that, thence & सुचिरम्- for a long time- all अव्ययs

महान्तं प्राप्य सद्बुद्धे सन्त्यजेन्न लघुजनम् ।
यत्रास्ति सूचिकाकार्यं, कृपाणः किं करिष्यति॥३२॥ -वैदिकवाङ्मयम् संघ

सद्बुद्धे, (कः अपि) महान्तम् प्राप्य, लघुजनम् न सन्त्यजेत् । यत्र सूचिकाकार्यम् अस्ति, (तत्र) कृपाणः किम् करिष्यति?

Oh, wise man, after getting to know big people, one should not abandon a small person. When a work can be accomlished by a needle, what will a sword do?

सद्बुद्धे- पु. लिं. सं. वि. ए. व. of सद्बुद्धिः- one with wisdom, sound mind, intelligent man- सत्- good, noble, virtuous, बुद्धिः- mind, thinking, thought- सत् बुद्धिः यस्य सः- बहुव्रीहि स., महान्तम् & लघुजनम्- both in पु. लिं. द्वि. वि. ए. व. of महत्- great, big, huge & लघुजनः- unimportant person, people of lower level- लघु- adjctv- light, low, insignificant, small, जनः- people, person- लघुः जनः- लघुजनः- वि. पू. प. कर्मधारय स., कृपाणः- a sword, knife- in पु. लिं. प्र. वि. ए. व., प्राप्य- पू. का. वा. ल्यबन्त धा. सा. आव्यय of प्र+ आप्- to achieve, get- (आप्- आप्नोति ५ ग. प. प. to get, obtain), सूचिकाकार्यम्- a need for a needle, work for a pin- सूचिका- स्त्री. लिं.-a needle, कार्यम्- work, in न. लिं. प्र. वि. ए. व.- कार्य- (also करणीय, कर्तव्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, सन्त्यजेत्- विध्यर्थ प्र. पु. ए. व. of सं+ त्यज्- to leave completely, leave altogether, give up- (त्यज्- त्यजति १ ग. प. प. to leave,

abandon), अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, करिष्यति- द्वि. भविष्य प्र. पु. ए. व. of कृ- करोति कुरुते ८ ग. प. प. to do, to make, न- no, not, यत्र- where, in which place, किम्- a particle of interrogation- all अव्ययs

व्यालाश्रयाऽपि विफलाऽपि सकण्टकाऽपि
वक्राऽपि पङ्किलभवाऽपि दुरासदाऽपि।
गन्धेन बन्धुरसि केतकि सर्वजन्तोरेको
गुणः खलु निहन्ति समस्तऽदोषान् ॥३३॥ - चाणक्यनीति- १७.२, -वैदिकवाङ्मयम् संघ

केतकि, (त्वम्) व्यालाश्रया अपि, विफला अपि, सकण्टका अपि, वक्रा अपि, पङ्किलभवा अपि, दुरासदा अपि असि, (तथाअपि त्वम्) गन्धेन (सर्वजन्तोः) बन्धुः असि। सर्वजन्तोः एकः गुणः खलु समस्तदोषान् निहन्ति ॥

Oh, Ketaki flower, you are surrounded by snakes, you do not bear fruits, you are thorny, your growth is crooked, you are in muddy thickets and you are also very difficult to approach. Still you are a dear friend because of your (wonderful) fragrance. For all living beings, a single good quality, indeed, strikes out rest of their disqualifications !

केतकि- स्त्री. लिं. सं. वि. ए. व. of केतकी- screw pine flower, व्यालाश्रया- an abode of snake- व्यालः- a snake, आश्रयः- refuge, resting place- व्यालानाम् आश्रया या सा- बहुव्रीहि स. विफला- one without fruits- फलम्- न. लिं- fruit- फलेन विना या सा- नञ् बहुव्रीही स., सकण्टका- one which thorny- कण्टकः/कम्- a thorn- कण्टकैः सह- सकण्टका- सह बहुव्रीहि स., वक्रा (वक्र- adjctv)- crooked, winding, पङ्किलभवा- growing in a muddy thickets- पङ्कः- mud, more, thick mass- पङ्किल- adjctv- muddy, dirty, dense growth- पङ्किले भवति इति- पङ्किलभवा- उपपद तत्पुरुष स., दुरासदा- difficult to reach, approach- दुःखेन आसद्यते इति- उपपद तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., गन्धेन- with fragrance, smell- पु. लिं. तृ. वि. ए. व. of गन्धः- बन्धुः- a kinsman, friend, dear one, एकः- one, single & गुणः- quality, virtue, property- all in पु. लिं. प्र. वि. ए. व., असि- वर्त. म. पु. ए. व. of अस्- अस्ति- २ ग. प. प. to be, to exist, सर्वजन्तोः- in पु. लिं. ष. वि. ए. व. of सर्वजन्तुः- सर्वः- all, entire, whole, जन्तुः- living being, creature- सर्वः जन्तुः- वि. पू. प. कर्मधारय स, निहन्ति- वर्त. प्र. पु. ब. व. of नि+ हन्-to strike of, eliminate- (हन्- हन्ति २ ग. प. प. to kill, strike), समस्तदोषान्- in पु. लिं. द्वि. वि. ब. व. of समस्तदोषः- disadvantages, entire bad qualities- समस्त- entire, compounded- all- क. भू. धा. वि. of सं+ अस्- to unite, bring together- (अस्- see above) दोषः- fault, weakness- समस्ताः दोषाः- समस्तदोषाः- वि. पू. प. कर्मधारय स, अपि- also, even & खलु- indeed, surely-both अव्ययs

शीतेऽतीते वसनमशनं वासरान्ते निशान्ते
क्रीडारम्भः कुवलयदृशां यौवनान्ते विवाहः ।
सेतोर्बन्धः पयसि गलिते प्रस्थिते लग्नचिन्ता
सर्वञ्चैतद्भवति विफलं स्वस्वकाले व्यतीते ॥३४॥ -सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम्

पाठभेदः वार्धके तीर्थयात्रां

स्वस्वकाले व्यतीते एतद् सर्वम् --- शीते अतीते वसनम्, वासरान्ते अशनम्, निशान्ते क्रीडारम्भः, यौवनान्ते कुवलयदृशाम् विवाहः, पयसि गलिते सेतोः बन्धः, प्रस्थिते लग्नचिन्ता, वार्धके तीर्थयात्रां च -- विफलम् भवति। ॥

Following activities are sure to fail when done past their own prime time - (Looking for warm) clothing after the cold season has lapsed, (eating) meals late in the evening (at the end of the day), (getting) playful (with a woman) after the night has ended, (planning) marriages of beautiful women after prime of their youth, building a dam after the water has drained away, worrying about auspicious time after starting an activity and going on a pilgrimage when too old.

वसनम्- clothing, dressing, अशनम्- food, eating, एतद्- this, it, सर्वम्- all, whole thing, विफलम्- fruitless, wasteful- फलम्- न. लिं.- fruit- फलेन विना यद् तद्- नञ् बहुव्रीहि स.- all in न. लिं. प्र. वि. ए. व., क्रीडारम्भः- start of play- क्रीडा- स्त्री. लिं.- play, pastime, आरम्भः- beginning, starting- क्रीडायाः आरम्भः- ष. तत्पुरुष स., विवाहः- marriage & बन्धः- construction, forming- all in पु. लिं. प्र. वि. ए. व., अतीते,व्यतीते, शीते, वासरान्ते, निशान्ते, यौवनान्ते, पयसि, गलिते, प्रस्थिते & स्वस्वकाले- all in पु/न. लिं. स. वि. ए. व. of अतीत, व्यतीत- past, gone away, lapsed- क. भू. धा. वि. of अति +इ- to go over, cross & वि+अति +इ- to transgress- (इ- एति २ ग. प. प. to go, come to), शीतम्- cold season, वासरान्तः- end of the day- वासरः/रम्- a day, day time, अन्तः- end, conclusion- वासरस्य अन्तः, निशान्तः- end of the night- निशा- night, night time, निशायाः अन्तः, यौवनान्तः- end of youth, prime- यौवनम्- youth, prime, यौवनस्य अन्तः- all three in ष. तत्पुरुष स., पयस्- water, गलित- drained- क. भू. धा. वि. of गल्- गलति १ ग. प. प. to drain out, ooze, trickle, प्रस्थितः- one who has set fourth, gone out- क. भू. धा. वि. of प्र+ स्था- to set forth, depart, स्वस्वकालः- one's own opportune time- स्व- self, one's own स्वस्व- one's own opportune, कालः- time, period- स्वस्वस्य कालः- ष. तत्पुरुष स. कुवलयदृशाम्- स्त्री. लि. ष. वि. ब. व. of कुवलयदृश्- a lotus eyed woman- कुवलयम्- blue lotus, water-lily, दृश्- eye sight, looking like- कुवलयस्य इव दृशौ यस्याः सा- बहुव्रीहि स., सेतोः- पु. लि. ष. वि. ए. व. of सेतुः- a ridge of earth, dam, लग्नचिन्ता- worrying about an auspicious moment to start- लग्नम्- an auspicious moment to start- चिन्ता- anxiety, thought- लग्नस्य चिन्ता- ष. तत्पुरुष स.- in स्त्री. लिं. प्र. वि. ए. व., भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, happen, च-and- अव्यय

यो ज्ञातिमनुगृह्णाति दरिद्रं दीनमातुरम्।
स पुत्रपशुभिर्वृद्धिं श्रेयश्चानन्त्यमश्नुते ॥३५॥ - महाभा. उद्योग पर्व ३७.१७, सुधर्मा पत्रिका

यः दरिद्रम्, दीनम्, आतुरम् ज्ञातिम् अनुगृह्णाति, सः पुत्रपशुभिः आनन्त्यम् वृद्धिम् श्रेयः च अश्नुते॥

One who shows kindness towards poor, distressesd and hurt people in his community, experinces endless prosperity and growth with children and livestock.

यः (यद्)- who & सः (तद्)- he- both in पु. लिं. प्र. वि. ए. व., ज्ञातिम् & वृद्धिम्- both in- स्त्री. लिं. द्वि. वि. ए. व. of ज्ञातिः- a kinsman, a relative & वृद्धिः- growth, prosperity, affluence, दरिद्रम्, दीनम् & आतुरम्- all in- पु. लिं. द्वि. वि. ए. व. of दरिद्रः- poor, needy, दीनः- afflicted, distressed, आतुरः- hurt, injured, over anxious, आनन्त्यम्- infinitely, limitlessly, eternally, boundlessly- अन्त्य- adjctv- end, last, final- न अन्त्य- अनन्त्य- endless- नञ् तत्पुरुष स. & अनन्त्यम् मर्यादीकृत्य- आ अनन्त्यम्- towards infinity -अव्ययीभाव स., श्रेयः- न. लिं. द्वि. वि. ए. व. of श्रेयस्- fame, renown, success, well-being, पुत्रपशुभिः- in- पु. लिं. तृ. वि. ब. व. of पुत्रपशुः- children and livestock (animals)- पुत्रः- son, child, पशुः- animal, livestock- पुत्रः च पशुः च- द्वंद्व स., अनुगृह्णाति & अश्नुते- both वर्त. प्र. पु. ए. व. of अनु- ग्रह्- to oblige, to show kindness, favour- (ग्रह्- गृह्णाति- ९ ग. उ. प. to hold, seize, take) & अश्- ५ ग. आ. प. to enjoy, get, obtain, experience, च-and- अव्यय

श्रेयो नूनं व्रजति स पुमाञ्शिक्षया वर्धितो यः
स्वच्छन्दं यश्चरति स पराभूतिमाप्नोति काले।
पूज्यो वेणुर्भवति च नतिं प्रापितो भूपतीनामन्यं
नृत्तोचितमिति करे नर्तकाः कल्पयन्ति॥३६॥ --सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्मयम् संघ

यः पुमान् शिक्षया वर्धितः, सः, नूनम् श्रेयः व्रजति। यः स्वच्छन्दम् चरति, सः, काले पराभूतिम् आप्नोति। भूपतीनाम् नतिम् प्रापितः वेणुः पूज्यः च भवति। अन्यम् (वेणुम्) नर्तकाः नृत्तोचितम् इति करे कल्पयन्ति॥

A person brought up with proper education and training certainly achieves success in life, while a person, who behaves in whatever manner he likes, will face failure in due course of time. A bamboo selected as staff of Kings, receives salutations and is venerable, while the some other staff may fit properly in hands of dancers in their performance.

यः (यद्)- who, सः (तद्)- he, पुमान् (पुंस्)- a man, human, person, वर्धितः- one who is grown in, brought up- वर्धित-प्रयोजक क. भू. धा. वि. of वृध्- वर्धयति- ते- to cause to grow- (वृध्- वर्धते १ ग. आ. प. to grow, thrive, प्रापितः- one who receives, obtains- प्रयोजक क. भू. धा. वि. of प्र+ आप्- प्रापयति-ते to cause to get- (आप्- आप्नोति ५ ग. प. प. to get), वेणुः- a bamboo, reed, पूज्यः- venerable, sacred, holy- (पूज्यः- पूजनीय & पूजितव्य- क. वि. धा. सा. वि. of पूज्- पूजयति-ते १० ग. उ. प. to worship, revere)- all in पु. लिं. प्र. वि. ए. व., शिक्षया- in स्त्री. लिं. तृ. वि. ए. व. शिक्षा- learning, education, study, श्रेयः (श्रेयस्)- glory, success, auspicious result & स्वच्छन्दम्- an uncontrolled manner, one's own choice- both in न. लिं. द्वि. वि. ए. व., पराभूतिम् & नतिम्- both in स्त्री. लिं. द्वि. वि. ए. व. of पराभूतिः- defeat, humiliation- (परा+ भू- to get defeated) & नतिः- salutation, bow, नृत्तोचितम् & अन्यम्- both in पु. लिं. द्वि. वि. ए. व. of नृत्तोचित- नृत्तम्, नृत्यम्- dancing, dance, उचित- fit, proper, suitable- क. भू. धा. वि. of उच्- उच्यति ४ ग. प. प. to collect, gather- नृत्ते उचितम्- नृत्तोचितम्- स. तत्पुरुष स. & अन्यः- the other, another, व्रजति, चरति, भवति & आप्नोति- all वर्त. प्र. पु. ए. व. of व्रज्- १ ग. प. प. to approach, go to, चर्- १ ग. प. प. to walk, go about, भू- १ ग. प. प. to be, to become & आप्- ५ ग. प. प. to get, obtain, काले- instantly, soon & करे- both in पु. लिं. स. वि. ए. व. of कालः- time & करः- hand, भूपतीनाम्- in पु. लिं. ष. वि. ब. व. of भूपतिः- a king- भूः- earth, ground, पतिः- master, husband, lord- भुवः पतिः- ष. तत्पुरुष स., नर्तकाः- in पु. लिं. प्र. वि. ब. व. of नर्तकः- a dancer, कल्पयन्ति- प्रयोजक वर्त. प्र. पु. ब. व. of क्लृप्- कल्पयति-ते- to find it fit, proper- (क्लृप्- कल्पते १ ग. आ. प. to be fit, adequate), नूनम्- certainly, indeed, च- and, इति- a particle used to express the very word spoken- thus, so- all अव्ययs वेणुः-Bamboo

साध्वीस्त्रीणां दयितविरहे मानिनां मानभङ्गे
सल्लोकानामपि जनरवे निग्रहे पण्डितानाम् ।
अन्योद्रेके कुटिलमनसां निर्गुणानां विदेशे
भृत्याभावे भवति मरणं किन्तु सम्भावितानाम् ॥३७॥ ---सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम्

साध्वी-स्त्रीणाम् दयित-विरहे, मानिनाम् मान-भङ्गे, सल्लोकानाम् जनरवे अपि, पण्डितानाम् निग्रहे, कुटिल-मनसाम् अन्योद्रेके, निर्गुणानाम् विदेशे, किन्तु सम्भावितानाम् भृत्याभावे मरणम् भवति॥

Following situations are like facing death! - Separation from their loved ones for virtuous women, humilation for self-respecting people, rumours of a scandal for noble people, suppression for the scholars, prosperity of others for the crooked minded, survival in a foreign land for unskilled people and disobedience from servants for esteemed people..

साध्वीस्त्रीणाम्- स्त्री. लिं. ष. वि. ब. व. of साध्वीस्त्री- साध्वी- virtuous, chaste woman, स्त्री- woman- वि. पू. प. कर्मधारय स., दयितविरहे, मानभङ्गे, जनरवे, निग्रहे, अन्योद्रेके, विदेशे & भृत्याभावे- all in पु. लिं. स. वि. ए. व. of दयितविरहः- separation from the beloved- दयितः- beloved, a husband, विरहः- parting, separation- दयितस्य विरहः- ष. तत्पुरुष स., मानभङ्गः- humiliation, loss of respect- मानः- respect, honour, भङ्गः- loss, break- मानस्य भङ्गः- ष. तत्पुरुष स., जनरवः- rumour, scandal- जनः- people, public, रवः- crying, murmur- जनानाम् रवः- ष. तत्पुरुष स., निग्रहः- control, suppression, अन्योद्रेक:- prosperity of others- अन्यः- the other, another, उद्रेकः- abundance, increase- अन्यानाम् उद्रेकः- ष. तत्पुरुष स., विदेशः- foreign land- देशः- country- विभिन्नः देशः- प्रादि कर्मधारय स. & भृत्याभावः- nullity or negation of servant- भृत्यः- a servant, support- (also भर्तव्य, भरणीय & भार्य- क. वि. धा. सा. वि. of भृ- ३ ग. उ. प. बिभर्ति - बिभृते to support, maintain), अभावः- absence, nullity or negation- भृत्यस्य अभावः- ष. तत्पुरुष स., मानिनाम्, सल्लोकानाम्, पण्डितानाम्, कुटिलमनसाम्, निर्गुणानाम्, सम्भावितानाम्- all in पु. लिं. ष. वि. ब. व. of मानिन्- self-respecting, सल्लोकः- good people- सत्- noble, virtuous, लोकः- people, person- सत् लोकः- वि. पू. प. कर्मधारय स., पण्डितः- scholar, expert, learned man, कुटिलमनस्- person with a fraudulent mind- कुटिल- crooked, fraudulent, मनस्- न. लिं.- mind, heart- कुटिलम् मनः यस्य सः- बहुव्रीहि स., निर्गुणः- worthless, one without any skill or quality- गणः- good quality, merit- निर्गताः गुणाः यस्मात् सः- बहुव्रीहि स., सम्भावितः- esteemed or honourable person- प्रयोजक क. भू. धा. वि. of सं+भू- सम्भावयति- ते- cause to be competent- (भू- भवति १ ग. प. प. to be), मरणम्- death, dying- in न. लिं. प्र. वि. ए. व., भवति-वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. tine, to become, to exist, अपि- also, even & किन्तु (किम् तु)- on the other hand, but- all अव्ययs

मित्रं स्वच्छतया रिपुं नयनबलैर्लुब्धं धनैरीश्वरं
कार्येण द्विजमादरेण युवतिं प्रेम्णा शमैर्बान्धवान्।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभिः रसिकं रसेन सकलं शीलेन कुर्याद्वशम्॥३८॥ --सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्ग्यम्

स्वच्छतया मित्रम्, नयनबलैः रिपुम्, धनैः लुब्धम्, कार्येण ईश्वरम्, आदरेण द्विजम्, प्रेम्णा युवतिम्, शमैः बान्धवान्, स्तुतिभिः अत्युग्रम्, प्रणतिभिः गुरुम्, कथाभिः मूर्खम्, विद्याभिः बुधम्, रसेन रसिकम्, शीलेन सकलम् वशम् कुर्यात्।

One can win over friend by transparency, an enemy with control, a greedy person with money, God by good deeds, a priest by respect, a young lady by love, relatives calmly, a very strong person by praise, a teacher by salutations, a stupid person by story telling, a learned man by knowledge, a tasteful man with delightful things and everybody else by good conduct..

स्वच्छतया- स्त्री. लिं. तृ. वि. ए. व. of स्वच्छता- cleanliness, transparency- मित्रम्- a friend- in न. लिं. द्वि. वि. ए. व., नयनबलैः, धनैः, शमैः- all in पु/न. लिं. तृ. वि. ब. व. of नयनबलः- means of management- नयन- conducting, managing, बलः-strength, means, नयनस्य बलः- ष. तत्पुरुष स., धनम्- wealth, money, शमः- calmness, tranquility, pacification, रिपुम्, लुब्धम्, ईश्वरम्, गुरुम्, अत्युग्रम्, मूर्खम्, बुधम्, द्विजम्, रसिकम्, सकलम् & वशम्- all in पु. लिं. द्वि. वि. ए. व. of रिपुः- enemy, adversary, लुब्धः- greedy, covetous, ईश्वरः- Lord, master, God, गुरुः- teacher, elder, respectable person, अत्युग्रः- अति- अव्यय- very, excessive, उग्रः- fierce, frightful, strong- अति उग्रः यः सः- बहुव्रीहि स., मूर्खः- stupid, fool, बुधः- learned, wise man, द्विज- a Brahmin, member of a priestly class, रसिकः- a man of taste, appreciator, सकलः- all, entire, everyone & वशः- under control, influence कार्येण- in न. लिं. तृ. वि. ए. व. of कार्यम्- work, action, deed (कार्य- also कृत्य, कर्तव्य & करणीय- क. वि. धा. सा. वि. of कृ-करोति-

कुरुते ८ ग. उ. प. to do), आदरेण, प्रेम्णा, रसेन & शीलेन - all in पु.. लिं. तृ. वि. ए. व. of आदरः- respect, reverence, प्रेमन्- affection, love, रसः- object of taste, liking & शीलः- character, good behaviour, युवतिम्- in स्त्री. लिं. तृ. वि. ए. व. of युवतिः- a young woman, बान्धवान्- in पु. लिं. द्वि. वि. ब. व. of बान्धवः- kinsman, relative, स्तुतिभिः, प्रणतिभिः, कथाभिः & विद्याभिः- all in स्त्री. लिं. तृ. वि. ब. व. of स्तुतिः- praise, adulation, प्रणतिः- salutation, obeisance & विद्या- scholarship, knowledge, learning, कथा- story, tale, an account, कुर्यात्- विद्यर्थ प्र. पु. ए. व. of कृ- to do (see above)

वस्त्रमापस्तिलान् भूमिं गन्धो वासयते यथा।
पुष्पाणाम् अधिवासेन तथा संसर्गजा गुणाः॥३९॥ -महाभा- वनपर्व १.२४

यथा अधिवासेन पुष्पाणाम् गन्धः वस्त्रम्, आपः, तिलान्, भूमिम्, वासयते तथा (मनुष्याणाम्) गुणाः संसर्गजाः (भवन्ति) ॥

Just like the flowers coming in contact with clothes, water, sesamum seeds and ground impart their fragrance to them, virtuous qualities of men get imparted to the other people, who come in contact with them.

अधिवासेन- in पु. लिं. तृ. वि. ए. व. of अधिवासः- habitation, dwelling, co-existance, पुष्पाणाम्- in न. लिं. ष. वि. ब. व. of पुष्पम्- flower, गन्धः- fragrance, perfume, वस्त्रम्- dress, clothes, cloth, आपः (आपस्)- water- both in न. लिं. द्वि. वि. ए. व., तिलान्- in न. लिं. द्वि. वि. ब. व. of तिलः- sesamum seed, भूमिम्- in स्त्री. लिं. द्वि. वि. ए. व. of भूमिः- earth, ground, वासयते- वर्त. प्र. पु. ए. व. of वास्- वासयते- ते १० ग. उ. प. to scent, perfume, incense, गुणाः & संसर्गजाः- both in पु. लिं. प्र. वि. ब. व. of गुणः- quality, virtue, property & संसर्गजः- that which is acquired by contact- संसर्गः- contact, company association, proximity- संसर्गेण जायते इति- संसर्गजः- उपपद तत्पुरुष स., यथा- in which manner, how, तथा- in that manner, similar to- both अव्ययs

कोऽर्थान्प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तं गताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः।
कः कालस्य न गोचरत्वमगमत् कोऽर्थी गतो गौरवं
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पथि ॥४०॥ - चाणक्रनीति-१६.४, वैदिकवाङ्गयम्

भुवि, कः अर्थान् प्राप्य न गर्वितः? कस्य विषयिणः आपदः अस्तम् गताः (नष्टाः)?, कस्य मनः स्त्रीभिः न खण्डितम्? कः नाम राज्ञाम् प्रियः? कः कालस्य गोचरत्वम् न अगमत्? कः अर्थी गौरवम् गतः? कः वा पुमान् पथि दुर्जन- वागुरासु पतितः, क्षेमेण यातः?

Who does not get arrogant after acquiring wealth in this world? Troubles of which person of worldly pleasures ever come to an end? Whose heart has not been broken by women? Whoever is truly beloved of Kings? Who has been able get out of control of the destiny? Which begger lives with dignity? And whoever fell in the traps of wicked men proceeds smoothly on his way?

कः (किम्)- who, which, अर्थी (अर्थिन्)- one who begs, seeks, asks, प्रियः- beloved, dear, favourite, पतितः- fallen, fallen into- पतित- क. भू. धा. वि. of पत्- पतति १ ग. प. प. to fall, fall down), यातः- one who has gone, gone away- यात- क. भू. धा. वि. of या- याति २ ग. प. प. to go, proceed, गर्वितः- one who got proud, arrogant- गर्वित- क. भू. धा. वि. of गर्व्- गर्वति १ ग. प. प. to be proud, haughty, गतः- gone-

गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go & कः पुमान्- (पुंस्)- person, man, human- all in पु. लिं. प्र. वि. ए. व., अर्थान्- in पु. लिं. द्वि. वि. ब. व. of अर्थः- wealth, objective, purpose, प्राप्य- पू. का. वा. धा. सा. अव्यय of प्र+ आप्- to achieve, obtain- (आप्- आप्नोति ५ ग. प. प. to get), कस्य, विषयिणः & कालस्य- all in पु. लिं. ष. वि. ए. व. of किम्- who, विषयिन्- a person of worldly pleasures & कालः- destiny, time, आपदः & गताः- both in स्त्री. लिं. प्र. वि. ब. व. of आपद्- trouble, distress & गता- gone, vanished- गत- see above, अस्तम्, गोचरत्वम् & गौरवम्- all in पु. लिं. द्वि. वि. ए. व. of अस्तः- decline, to end, गोचरत्वः- influence control, scope- (गो- cattle- गो+ चरः- range of cattle pasturage, scope, range- त्व- suffix implies quality) & गौरवः- respect, dignity, honour, भुवि & पथि- both स. वि. ए. व. of भू- स्त्री. लिं- earth, world & पथिन्- पु. लिं- way, road, मनः (मनस्)- mind, heart & खण्डितम्- broken, distressed- खण्डित- क. भू. धा. वि. of खण्ड्- खण्डयति-१० ग.प. प. to break, distoy- both in न. लिं. प्र. वि. ए. व., स्त्रीभिः- in स्त्री. लिं. तृ. वि. ब. व. of स्त्री- woman, female, राज्ञाम्- in पु. लिं. ष. वि. ब. व. of राजन्- King, अगमत्- अनद्यतनभूत प्र. पु. ए..व. of गम्- गच्छति १ ग. प. प. to go, दुर्जनवागुरासु- in स्त्री. लिं. स. वि. ब. व. of दुर्जन- wicked person- दुष्टः जनः- प्रादि कर्मधारयस., वागुरा- स्त्री. लिं.- trap, snare, clutch- दुर्जनस्य वागुरा- ष. तत्पुरुष स., क्षेमेण- in पु/न. लिं. तृ. वि. ए. व. of क्षेम- wellbeing, न- no, not, नाम- a particle used in the sense: named, called, truly, indeed & वा- or, and- all अव्ययs

वैद्यं पानरतं नटं कुपठिनं स्वाध्यायहीनं द्विजं
योधं कापुरुषं हयं गतरयं मूर्खं परिव्राजकम्।
राजानं च कुमन्त्रिभिः परिवृतं देशं च सोपद्रवं
भार्यां यौवनगर्वितां पररतां मुञ्चन्ति ते पण्डिताः॥४१॥ -सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम्

(ये) पानरतम् वैद्यम्, कुपठिनम् नटम्, स्वाध्यायहीनम् द्विजम्, कापुरुषम् योधम्, गतरयम् हयम्, मूर्खम् परिव्राजकम्, कुमन्त्रिभिः परिवृतम् च राजानम्, सोपद्रवम् च देशम्, यौवनगर्विताम् पररताम् भार्याम् मुञ्चन्ति, ते पण्डिताः (भवन्ति)।

Those who get rid of following people are indeed wise men! -- A physician addicted to drinking, an actor who is a bad pronouncer (reader), a priest without any knowledge of scriptures, a warrior who is a coward, a horse which has lost its vigour, a mendicant who is stupid, a King who is surrounded by ill- advising ministers, a country which is full of violence and a wife, proud of her youth,finds delight in company of others.

पानरतम्, वैद्यम्, कुपठिनम्, नटम्, स्वाध्यायहीनम्, द्विजम्, कापुरुषम्, योधम्, गतरयम् हयम्, परिव्राजकम् मूर्खम्, परिवृतम् राजानम्, सोपद्रवम् & देशम्- all in पु. लिं. द्वि. वि. ए. व. of पानरतः- addicted to drinking- पानम्- drink, spirituous liquor, रतः- addict, engaged- क. भू. धा. वि. of रम्- रमते १ ग. आ. प. to rejoice, take delight- पाने रतः -सप्तमी तत्पु. स., वैद्यः- physician, doctor, कुपठिन्- bad pronouncer, reader- कु- अव्यय- suffix implies bad, poor, पठिन्- pronouncer, reader- कुत्सितः पठी- प्रादि कर्मधारय स., नटः- actor, performer, स्वाध्यायहीनः- one who is devoid of any sacred knowledge- स्वाध्याय- study of sacred texts, हीनः- one who is devoid of- हीन- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to leave, abandon- स्वाध्यायेन हीनः- तृ. तत्पुरुष स., द्विजः- a member of priestly class, Brahmin, कापुरुषः- coward- पुरुषः- man, person- कुत्सितः पुरुषः- प्रादि कर्मधारय स., योधः- warrior, soldier, गतरयः- one who has lost speed- गत- gone, past- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. Togo, रयः- speed, zeal- गतः रयः - वि. पु. प. कर्मधारय स., हयः- a horse, परिव्राजकः- a wandering mendicant, recluse, मूर्खः- stupid, fool, परिवृतः- one who is surrounded- क. भू. धा. वि. of परि+ वृ- to surround- (वृ- to १, ५ &९ उ. प.-वरति- ते, वृणोति- वृणुते, वृणाति- वृणीते- to choose, select), राजन्- King, सोपद्रवः- one with violence, distress- उपद्रवः- violence, distress, trouble- उपद्रवेण सह- सोपद्रवः- सह- बहुव्रीहि स., देशः- country,

place, यौवनगर्विताम्, पररताम् & भार्याम्- all in पु. लिं. द्वि. वि. ए. व. of यौवनगर्विता- one who is proud of her youth- यौवनम्- youth, गर्विता- arrogant, proud- गर्वित- क. भू. धा. वि. of गर्व्- गर्वति १ ग. प. प. to be arrogant- यौवनेन गर्विता- तृ. तत्पुरुष स., पररता- one who finds delight in others- पर- other, रता- see above- परे रता या सा- बहुव्रीहि स. & भार्या- wife, मुञ्चन्ति- वर्त. प्र. पु. ब. व. of मुञ्च्- मुञ्चति- ते ६ ग. उ. प. to lose, set free, let go, कुमन्त्रिभिः- in पु. लिं. तृ. वि. ब. व. of कुमन्त्रिः (कुमन्त्रिन्)- bad advisor, minister, ते & पण्डिताः- both in पु. लिं. प्र. वि. ब. व. of तद्- he & पण्डित- wise man, scholar

छेदश्चन्दनचूतचम्पकवने रक्षापि शाखोटके
हिंसा हंसमयूरकोकिलकुले काकेषु नित्यादरः।
मातङ्गेन खरक्रयः समतुला कर्पूरकार्पासयो-
-रेषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः॥४२॥ -सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम्

(यत्र) चन्दनचूतचम्पकवने छेदः (तथा) शाखोटके अपि रक्षा (भवति), हंसमयूरकोकिलकुले हिंसा (तथा) काकेषु नित्यादरः (भवति), मातङ्गेन खरक्रयः (तथा) कर्पूरकार्पासयोः समतुला (भवति), गुणिगणे यत्र एषा विचारणा तस्मै देशाय नमः॥

A country where sandalwood, mango and champak trees are cut off and a Shakotaka tree is preserved, where swan, peacock and cuckoos are tortured and crows are always welcomed, where elephant is bartered with a donkey and camphor and cotton are measured on an equal scale and where this type of evaluation is done for items having meritorious qualities, we salute that country!.

छेदः- cutting, felling down & खरक्रयः- purchasing of a donkey- खरः- a donkey, क्रयः- buying, purchasing- खरस्य क्रयः- ष. तत्पुरुष स. & नित्यादरः- always reverence, care- नित्यम्- अव्यय- always, constantly, आदरः- reverence, care- नित्यम् आदरः यस्मिन् सः- बहुव्रीहि स.- all in पु. लिं. प्र. वि. ए. व., शाखोटके & गुणिगणे- both in पु. लिं. स. वि. ए. व. of शाखोटकः- sand-paper tree, a wild herb & गुणिगणः- गुणिन्- one possessed with merit, quality, गणः- group flock- गुणिनाम् गणः- ष. तत्पुरुष स., चन्दनचूतचम्पकवने & हंसमयूरकोकिलकुले -both in न. लिं. स. वि. ए. व. of चन्दनचूतचम्पकवनम्- grove of sandalwood, mango and champak- चन्दनः- sandalwood, चूतः- mango tree, चम्पकः- champak tree, वनम्- grove, thicket of trees- चन्दनः च चूतः च चम्पकः च- चन्दनचूतचम्पकः- द्वंद्व स. & चन्दनचूतचम्पकस्य वनम्- ष. तत्पुरुष स., हंसमयूरकोकिलकुलम्- flocks of swans, peacocks and koyals- हंसः- swan, मयूरः- peacock, कोकिलः- koyal, cuckoo bird, कुलम्- family, race, flock- हंसः च मयूरः च कोकिलः च- हंसमयूरकोकिलः- द्वंद्व स. & हंसमयूरकोकिलस्य कुलम्- ष. तत्पुरुष स., काकेषु- in पु. लिं. स. वि. ब. व. of काकः- a crow, मातङ्गेन- in पु. लिं. तृ. वि. ए. व. of मातङ्गः- an elephant, कर्पूरकार्पासयोः- न. लिं. ष. वि. द्वि. व. of- कर्पूरकार्पासौ- कर्पूरम्- camphor, कार्पासम्- anything made of cotton- कर्पूरम् च कार्पासम् च- कर्पूरकार्पासौ- द्वंद्व स, रक्षा- protection, preservation, हिंसा- torture, injury, destruction, समतुला- that measured equally- सम- adjctv- equal, same, तुला- balance, measure- समा तुला या सा- बहुव्रीही स., एषा (एतद्)- this, this type of, विचारणा- thinking, consideration- all in स्त्री. लिं. प्र. वि. ए. व., तस्मै & देशाय- both in पु. लिं. च. वि. ए. व. of तद्- that & देशः- country, place, नमः (नमस्)- salutation, bow, अपि- even, also, यत्र- where, in which case-all अव्ययs

अर्थाधीताश्च यैर्वेदास्तथा शूद्रान्नभोजिनः।
ते द्विजाः किं करिष्यन्ति निर्विषा इव पन्नगाः ॥४३॥ - चाणक्यनीतिदर्पण अ. ९ श्लो. ८

यैः वेदाः अर्थाधीताः च तथा (ये) शूद्रान्नभोजिनः ते द्विजाः, निर्विषाः पन्नगाः इव (भवन्ति), (ते) किम् करिष्यन्ति ?

Brahmins who study the Holy Scriptures (Vedas) soly for the purpose of earning wealth and those who partake food from a member of lowest class, are like poison-less snakes (powerless). What good are they really? (What can they really do?)

यैः- पु. लिं. तृ. वि. ब. व. of यद्-who, वेदाः, अर्थाधीताः, शूद्रान्नभोजिनः,द्विजाः, निर्विषाः, पन्नगाः & ते - all in पु. लिं. प्र. वि. ब. व. of वेदः- holy scripture, Veda, अर्थाधीतः- अर्थः- wealth, money materialistic purpose, अधीतः- one who studied, learnt- अधीत- क. भू. धा. वि. of अधि+ इ- to study, learn- (इ- एति २ ग. प. प. to go)- अर्थनिमित्तम् अधीतः- अर्थाधीतः- उत्तरपदलोपी कर्मधारय स., शूद्रान्नभोजिन्- one who partakes food from a member of contemptible class- शूद्रः- a member of the lowest Varna, member engaged in unclean menial services- अन्नम्- food भोजिन्- eater, partaker- शूद्रःस्य अन्नम्- शूद्रान्नम् & शूद्रान्नस्य भोजिन्- शूद्रान्नभोजिन्- ष. तत्पुरुष स.., द्विजः- twice born, a member of highest class, learned man, निर्विषः- one who is poison less- विषम्- poison, venom- निर्गतम् विषम् यस्मात् सः- बहुव्रीहि स., पन्नगः- snake- पन्नः- fallen, descended- पन्न- क. भू. धा. वि. of पद्- पद्यते ४ ग. आ. प. to go, approach- पन्नः गच्छति इति- पन्नगः- उपपद तत्पुरुष स., & तद्- he, करिष्यन्ति- द्वि. भविष्य. प्र. पु. ब. व. of कृ-करोति- कुरुते ८ ग.उ. प. to do, make, च-and, तथा- and, likewise, in this way, किम्- a particle of interrogation: what & इव- just like, similar to- all अव्ययs

माता च कमला देवी पिता देवो जनार्दनः।
बान्धवा विष्णुभक्ताश्च स्वदेशो भुवनत्रयम्॥४४अ॥ -चाणक्यनीतिदर्पण अ. १० श्लो. १४

माता च पार्वती देवी पिता देवो महेश्वरः।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥४४ब॥ -आदिशंकरविरचित अन्नपूर्णास्तोतम्

अ) (यस्य) माता च कमला देवी, पिता देवः जनार्दनः, बान्धवाः विष्णुभक्ताः च, (तस्य) स्वदेशः भुवनत्रयम् (वर्तते)।
ब) (यस्य) माता च पार्वती देवी, पिता देवः महेश्वरः बान्धवाः शिवभक्ताः च, (तस्य) स्वदेशः भुवनत्रयम् (इव वर्तते)।

For a person, whose mother is like goddess Lakshmi or Parvati, whose father is like Lord Vishnu or Shiva and their devotees are his relatives, his own country is equal to all the three worlds taken together.

माता (मातृ)- कमला- an epithet of goddess Lakshmi, देवी- goddess, पार्वती- goddess Parvati- all in स्त्री. लिं. प्र. वि. ए. व., पिता (पितृ)- देवः- god, जनार्दनः- an epithet of god Vishnu, महेश्वरः- महान् ईश्वरः- वि. पू. प. कर्मधारय स- god Shiva स्वदेशः- one's own country- स्व- one's own, self, देशः- place, country- स्वस्य देशः- ष.तत्पुरुष स. -all in पु. लिं. प्र. वि. ए. व., बान्धवाः, विष्णुभक्ताः & शिवभक्ताः- all in पु. लिं. प्र. वि. ब. व. of बान्धवः- kinsman, relationship, विष्णुभक्तः- a devotee of Lord Vishnu- विष्णोः भक्तः & शिवभक्तः- a devotee of Lord Shiva- शिवस्य भक्तः- both ष. तत्पुरुष स., भुवनत्रयम्- all three worlds- earth heaven and power region- भुवनम्- world- त्रयम्- a triad, a group or collection of three- in न. लिं. प्र. वि. ए. व.- भुवनानाम् त्रयम्- भुवनत्रयम्- ष. तत्पुरुष स.

यस्मिन् रुष्टे भयं नास्ति तुष्टे नैव धनागमः ।
निग्रहोऽनुग्रहो नास्ति स रुष्टः किं करिष्यति ॥४५॥ - चाणक्यनीतिदर्पण अ. ९ श्लो. ९

यस्मिन् रुष्टे भयम् न अस्ति, तुष्टे धनागमः न एव (भवति), (तथा) निग्रहः अनुग्रहः (अपि) न अस्ति, सः रुष्टः किम् करिष्यति?

What that angry person can do if there is no fear if he gets angry or no possibility of getting money from him if he is pleased with us and if he can neither control us nor oblige us ?

यस्मिन्, रुष्टे & तुष्टे- all in पु. लिं. स. वि. ए. व. of यद्- who, रुष्टः- one who is angry & तुष्टः- one who is satisfied, pleased- both क. भू. धा. वि. of रुष्- रुष्यति ४ ग. प. प. to be angry, offended & तुष्- तुष्यति ४ ग. प. प. to be pleased, satisfied, सः (तद्)- he, धनागमः- gain of wealth- धनम्- न. लिं- wealth, money & आगमः- coming, arriving, acquisition (आ+ गम्-to come, १ ग. प. प.)- धनस्य आगमः- ष. तत्पुरुष स., निग्रहः- obstruction, check, control & अनुग्रहः- favour, obligation- (नि+ ग्रह्- to control & अनु+ ग्रह्- to favour, oblige- ग्रह्- गृह्णाति- गृह्णीते ९ ग. उ. प. to hold), रुष्टः- angry- all n पु. लिं. प्र. वि. ए. व., भयम्- fear, dread, danger- in न. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्- to exist, to be & करिष्यति- द्वि. भविष्य प्र. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, एव- only, just, न- no, not, किम्- a particle used in the sense of interrogation: what- all अव्ययs

स्वहस्तग्रथिता माला स्वहस्तघृष्टचन्दनम् ।
स्वहस्तलिखितं स्तोत्रं शक्रस्यापि श्रियं हरेत् ॥४६॥ - चाणक्यनीतिदर्पण अ. ९ श्लो. १२

स्वहस्त-ग्रथिता माला, स्वहस्त-घृष्ट-चन्दनम्, स्वहस्त- लिखितम् स्तोत्रम्, शक्रस्य अपि श्रियम् हरेत्॥

A garland strung by one's own hand, sandalwood paste made by one's own hand and a hymn of praise written by oneself can steal away even the splendour of King of Gods, Indra!

A puja done with self made items with full devotion is better than offering even the King's riches.

स्वहस्तग्रथिता- strung by one's own hand- स्व- one's own, self, हस्तः- hand, ग्रथिता- strung or tied together- ग्रथित- क. भू. धा. वि. of ग्रंथ्- ग्रंथति & ग्रथ्नाति- १ & ९ प. प. & ग्रंथयति- ते १० ग. उ. प. to string together, fasten, tie- स्वस्य हस्तः- स्वहस्तः- one's own hand- ष. तत्पुरुष स. & स्वहस्तेन ग्रथिता- तृ. तत्पुरुष स. & माला- garland- both in स्त्री. लिं. प्र. वि. ए. व., स्वहस्तघृष्टचन्दनम्- sandalwood paste made in one's own hand- स्वहस्त- see above, घृष्ट- crushed, powdered- क. भू. धा. वि. of घृष्- घर्षति- १ ग. प. प. to rub, crush, grind- चन्दनम्- sandalwood, स्वहस्तेन घृष्टम्- स्वहस्तघृष्टम्- तृ. तत्पुरुष स. & स्वहस्तघृष्टम् चन्दनम्- वि. पू. प. कर्मधारय स., स्वहस्तलिखितम्- written by one's own hand- स्वहस्त- as above, लिखितम्- written, composed- लिख्- लिखति- ६ ग. प. प. to write, to write down- स्वहस्तेन लिखितम्- तृ. तत्पुरुष स., स्तोत्रम्- a hymn of praise- all in न. लिं. प्र. वि. ए. व., शक्रस्य- in पु. लिं. ष. वि. ए. व. of शक्रः- name of Indra- King of Gods, श्रियम्- in स्त्री. लिं. द्वि. वि. ए. व. of श्रीः- excellence, grace, richness, हरेत्- विध्यर्थ प्र. पु. ए. व. of हृ- हरति १ ग. प. प. to carry away, take away, अपि- also, even-अव्यय

इक्षुदण्डास्तिलाः क्षुद्राः कान्ता हेम च मेदिनी।
चन्दनं दधि ताम्बूलं मर्दनं गुणवर्धनम् ॥४७॥ - चाणक्यनीतिदर्पण अ. ९ श्लो. १३

इक्षुदण्डाः, तिलाः, क्षुद्राः, कान्ता, हेम च मेदिनी, चन्दनम्, दधि, ताम्बूलम्, मर्दनम् गुणवर्धनम् भवन्ति॥

Crushing of sugarcane and sesame seeds, control of low mean people, taking good care of wife, beating of gold, ploughing of the ground, grinding of a sandalwood, churning of curds and chewing of a tamboola (Pan) extract the best out of them.

इक्षुदण्डाः तिलाः & क्षुद्राः- all in पु. लिं. प्र. वि. ब. व. of इक्षुदण्डः- sugarcane, तिलः- sesamum seed & क्षुद्रः- low, mean person, कान्ता- wife, woman, मेदिनी- earth, ground- both in स्त्री. लिं. प्र. वि. ए. व., हेम (हेमन्)- gold, चन्दनम्- sandalwood, दधि- curd, ताम्बूलम्- (Beeda)- betel-nut, pan and other ingredients generally chewed after meals, मर्दनम्- crushing, grinding, rubbing, anointing, pressing, kneading- (मृद्- मृद्नाति ९ ग. प. प. to squeeze, , press, stroke, rub against)- गुणवर्धनम्- enhancement of quality- गुणः/गुणम्- quality, property, nature, वर्धनम्- enhancement, improvement, increase- all in न. लिं. प्र. वि. ए. व., (वृध्- वर्धते १ ग. आ. प. to increase)- गुणस्य वर्धनम्- ष. तत्पुरुष स., च- and- अव्यय

लुब्धानां याचकः शत्रुर्मूर्खाणां बोधको रिपुः।
जारस्त्रीणां पतिः शत्रुश्चौराणां चन्द्रमा रिपुः ॥४८॥ - चाणक्यनीतिदर्पण अ. १० श्लो. ६

लुब्धानाम् याचकः शत्रुः (अस्ति)। मूर्खाणाम् बोधकः रिपुः (अस्ति)। जारस्त्रीणाम् पतिः शत्रुः (अस्ति)। चौराणाम् चन्द्रमा रिपुः (भवति) ॥

For greedy people anyone seekin help is an enemy. For stupid people, an instructor is an adversary. For adulteress women, their husband is an enemy. For thieves the Moon becomes an adversary.

लुब्धानाम्, मूर्खाणाम् & चौराणाम्- all in पु. लिं. ष. वि. ब. व. of लुब्धः- greedy, covetous- लुब्ध- क. भू. धा. वि. of लुभ्- लुभ्यति ४ ग. प. प. to cover, desire, long, मूर्खः- a stupid, fool & चौरः (चोरः)- a thief, robber, जारस्त्रीणाम्- in स्त्री. लिं. ष. वि. ब. व. of जारस्त्री- an adulteress woman- जारः- a paramour, जारा- an adulteress, स्त्री- woman, wife- जारा स्त्री- वि. पू. प. कर्मधारय स., याचकः- seeker, begger, शत्रुः =रिपुः- enemy, adversary, बोधकः- advisor, instructor, पतिः- husband, master, चन्द्रमा- (चन्द्रमस्)- all in पु. लिं. प्र. वि. ए. व.

अन्तःसारविहीनानामुपदेशो न जायते ।
मलयाचलसंसर्गान्न वेणुश्चन्दनायते ॥४९॥ - चाणक्यनीतिदर्पण अ. १० श्लो. ८

अन्तःसारविहीनानाम् उपदेशः न जायते । वेणुः मलयाचलसंसर्गात् न चन्दनायते।

Those who do not natural (inborn) ability to grasp, no advice will yield any result. By just being on Malaya- mountains (which have abundant sandalwood forests), a bamboo does not acquire the fragrance of sandalwood.

अन्तःसारविहीनानाम्- पु. लिं. ष. वि. ब. व. of अन्तःसारविहीनः- अन्तः (अन्तर्)- अव्यय- inside, within interior, सारः- essence, essential part, विहीनः- one who is devoid of- विहीन- क. भू. धा. वि. of वि+ हा- to be devoid of (हा- जहाति ३ ग. प. प. to abandon, leave)- अन्तःस्थितः सारः- अन्तःसारः- उत्तर प. लो. स. & अन्तःसारेण विहीनः- अन्तःसारविहीनः- तृ. तत्पुरुष स., उपदेशः- teaching, instruction, advice & वेणुः- bamboo, reed- both in पु. लिं. प्र. वि. ए. व., जायते - वर्त. प्र. पु. ए. व. of जन्- ४ ग. आ. प. to be born, produced, rise, spring up, मलयाचलसंसर्गात्-in पु. लिं. पं. वि. ए. व. of मलयाचलसंसर्गः- an association

with or dwelling in Malaya mountain range- मलयः- name of a mountain range in India (known to be rich in sandalwood trees), अचलः- (चलः- one which is moving- न चलः- अचलः- नञ् तत्पुरुष स.)- immovable, mountain, संसर्गः- contact, association- अचलः मलयः - मलयाचलः- वि. उ. कर्मधारय स. & मलयाचलस्य संसर्गः- मलयाचलसंसर्गः- ष. तत्पुरुष स., चन्दनायते- वर्त. प्र. पु. ए. व. of नामसाधितधातु of चन्दनः- sandalwood, न- no, not- अव्यय

वरं वने व्याघ्रगजेन्द्रसेवितं
द्रुमालये पत्रफलाम्बुभोजनम्।
तृणेषु शय्या शतजीर्णवल्कलं
न बन्धुमध्ये धनहीनजीवनम् ॥५०॥ -चाणक्यनीतिदर्पण अ. १० श्लो. १२

व्याघ्रगजेन्द्रसेवितम् वने, द्रुमालये पत्रफलाम्बुभोजनम्, तृणेषु शय्या (तथा) शतजीर्णवल्कलम् वरम्, बन्धुमध्ये धनहीनजीवनम् न (वरम्) ॥

It is preferable to live in a forest inhabited by tigers and mighty elephants or under a shelter of trees surviving on leaves, fruits and water or on a bed of grass and wearing bark garments worn-out at hundred places than to live in poverty amidst one's relatives..

वने, द्रुमालये & बन्धुमध्ये- all न. लिं. स. वि. ए. व. of वनम्- forest, द्रुमालयम्- house or abode under a tree- द्रुमः- a tree, आलयम्- a house, abode, place-द्रुमः एव आलयः- a कर्मधारय स., बन्धुमध्यम्- amidst kinsmen, relatives, बन्धुः- kinsman brother, मध्यम्- adjctv- amidst, among- बन्धूनाम् मध्यम्- ष. तत्पुरुष स., व्याघ्रगजेन्द्रसेवितम्- one which is inhabited tigers and mighty elephants- व्याघ्रः- tiger, गजेन्द्रः- king elephant- गजः- elephant, इन्द्रः- lord, king- गजेषु इन्द्रः- गजेन्द्रः- स. तत्पुरुष स. & सेवितम्- one that is inhabited- सेवित- क. भू. धा. वि. of सेव्- सेवते १ ग. आ. प. to serve, to resort to, to frequent- व्याघ्राः च गजेन्द्राः च- व्याघ्रगजेन्द्राः द्वंद्व स. & व्याघ्रगजेन्द्रैः सेवितम्- व्याघ्रगजेन्द्रसेवितम्- तृ. तत्पुरुष स. & पत्रफलाम्बुभोजनम्- survival on leaves, fruits and water- पत्रम्- a leaf, फलम्- a fruit, अम्बु- water, भोजनम्- a meal, lunch, feeding- पत्रम् च फलम् च अम्बु च- पत्रफलाम्बु- द्वंद्व स. & पत्रफलाम्बूनाम् भोजनम्- ष. तत्पुरुष स., शतजीर्णवल्कलम्- शतम्- hundred, जीर्णम्- worn out- जीर्ण- क. भू. धा. वि. of जृ(दीर्घ)- १, ४ & ९ प. प. & १० उ. प. -जरति, जीर्यति, जृणाति & जारयति-ते- to wear out, grow old, वल्कलम्- bark- garment- शतस्थानेषु जीर्णम्- शतजीर्णम्- उ. प. लो. कर्मधारय स. & शतजीर्णम् वल्कलम्- शतजीर्णवल्कलम्- वि. पू. प. कर्मधारय स. & धनहीनजीवनम्- living in poverty- धनम्- wealth, money, हीनम्- devoid of, without- हीन- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to leave, abandon, जीवनम्- life, survival- धनेन हीनः- धनहीनः- तृ. तत्पुरुष स. & धनहीनस्य जीवनम्- ष. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., तृणेषु- in न. लिं. स. वि. ब. व. of तृणम्- grass, शय्या- bed- in स्त्री. लिं. प्र. वि. ए. व., वरम्- is preferred, preferable to, better than & न- no, not- both अव्ययs

का श्लाघ्या गुणिनां क्षमा परिभवः को यः स्वकुल्यैः कृतः
किं दुःखं परसम्श्रयो जगति कः श्लाघ्यो य आश्रीयते।
को मृत्युर्व्यसनं शुचं जहति के यैर्निर्जिताः शत्रवः
कैर्विज्ञातमिदं विराटनगरे छन्नस्थितैः पाण्डवैः ॥५१॥ -सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम्

का श्लाघ्या गुणिनाम् ? क्षमा। कः परिभवः ? यः स्वकुल्यैः कृतः। किम् दुःखम् ? परसम्श्रयः जगति। कः श्लाघ्यः? यः आश्रीयते। कः मृत्युः? व्यसनम् । के शुचम् जहति? यैः शत्रवः निर्जिताः। इदम् कैः विज्ञातम्? विराटनगरे छन्नस्थितैः पाण्डवैः॥

What is praiseworthy in wise people? Their forgiveness. Which is the greatest humiliation? One done by one's own family. What is a sorrow? Seeking refuge at other's place. In this world, who is praiseworthy? One, who provides shelter to others, What is death? Suffering a defeat or addiction. Who are free from sorrow? Those who have defeated their enemies. By whom all this was realized? By Pandavas, during their incognito stay in Virata-nagar.

का- (किम्)- who, श्लाघ्या- praiseworthy- श्लाघ्य (also श्लाघनीय & श्लाघितव्य)- क. वि. धा. सा. वि. of श्लाघ्- श्लाघते १ ग. आ. प. to praise extol, क्षमा- forgiveness, forbearance, patience- all in स्त्री. लिं. प्र. वि. ए. व., कः (किम्)- who, परिभवः- insult, humiliation, degradation, यः (यद्)- which, what, कृतः- done, committed- कृत- क. भू. धा. वि. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, परसम्श्रयः- seeking shelter of others- परः- other, another, सम्श्रयः- refuge, shelter, habitation- परस्य सम्श्रयः- ष. तत्पुरुष स., श्लाघ्यः- praiseworthy- see above, मृत्युः- death, end of life- all in पु. लिं. प्र. वि. ए. व., गुणिनाम्- in पु. लिं. ष. वि. ब. व. of गुणिन्- meritorious, knowledgeable, स्वकुल्यैः, छन्नस्थितैः, पाण्डवैः, कैः & यैः- all in पु. लिं. तृ. वि. ब. व. of स्वकुल्यः- a member of one's own- स्व- one's own, self, कुल्यः- of family, race- स्वस्य कुल्यः- ष. तत्पुरुष स., छन्नस्थितः- one who stayed in hiding- छन्न- hidden, under cover- क. भू. धा. वि. of छद्-१ & १० ग. उ. प.- छदति- ते, छादयति- ते- to cover, hide, स्थितः- stayed- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stand, stay- छन्नः स्थितः- छन्नस्थितः- वि. उ. प. कर्मधारय स., पाण्डवः- a son of king Pandu, किम्- who & यद्- who, किम्- what, दुःखम्- pain, regret, sorrow, व्यसनम्- distribution, defeat addiction, weak point, शुचम्- grief, sorrow, विज्ञातम्- perceived, understood- विज्ञात- क. भू. धा. वि. of वि+ज्ञा- to perceive, know- (ज्ञा- जानाति जानीते ९ ग. उ. प. to know, understand) & इदम्- this, it- all in न. लिं. प्र. वि. ए. व., आश्रीयते- प्रयोजक वर्त. प्र. पु. ए. व. of आ+ श्रि- causes to provide shelter, refuge, protection- (श्रि- श्रयति- ते १ ग. उ. प. to go to, resort to) & जहति- वर्त. प्र. पु.. ब. व. of हा- २ ग. प. प. to leave, abandon, जगति & विराटनगरे- in न. लिं. स. वि. ए. व. of जगत्- world, earth & विराटनगरम्- name of a town- विराटः- name of king of Matsya dynasty, नगरम्- twin, city- विराटस्य नगरम्- ष. तत्पुरुष स., के, शत्रवः & निर्जिताः- all in पु. लिं. प्र. वि. ब. व. of किम्- who, शत्रुः- enemy, adversary & निर्जितः- one who has conquered, won- निर्जित- क. भू. धा. वि. of निस्+ जि- to conquer, win, defeat- (जि- जयति १ ग. प. प. to win, conquer

किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मति:
किं शास्त्रं श्रवणेन यस्य गलति द्वैतान्धकारोदय: ।
किं मित्रं सततोपकाररसिकं तत्त्वावबोध: सखे
क: शत्रुर्वद खेददानकुशलो दुर्वासनासंचय: ॥५२॥ -सुभाषितरत्नभाण्डागारम्, -वैदिकवाङ्मयम्

सखे, किम् तीर्थम्? हरिपादपद्मभजनम्। किम् रत्नम्? अच्छा मतिः। किम् शास्त्रम्? यस्य श्रवणेन द्वैतान्धकारोदयः गलति (तद् शास्त्रम्)। किम् मित्रम्? सततोपकाररसिकम् (तथा यः) तत्त्वावबोधः (तद् मित्रम्)। कः शत्रुः वद? खेददानकुशलः (तथा) दुर्वासनासञ्चयः (सः शत्रुः)॥

Oh, my friend, what is a sacred place? It is worship of lotus feet of the Lord Vishnu. What is a precious jewel? It is pure way of thinking. What is scientific or sacred knowledge? It is the one which removes the darkness of dualism. Who is a friend? He is the one who is always ready to help and who perceives exact nature of things. Now tell me, who is an enemy? He is the one who is expert in giving distress and the one with piles of bad habits.

किम्- what तीर्थम्- holy place, purifying object, हरिपादपद्मभजनम- हरिः- God, Vishnu, पाद- foot, पद्म- lotus, भजनम्- worship, service- पद्मम् इव पादम्- पादपद्मम्- पू.प. उपमा कर्मधारय स. & हरेः पादपद्मम्- हरिपादपद्मम् & हरिपादपद्मस्य भजनम्- both ष. तत्पुरुष स., रत्नम्- prescious stone, jewel, शास्त्रम्- scripture, scientific knowledge, मित्रम्- friend, सततोपकाररसिकम्- always ready to help- सतत- adjctv- constant, perpetual, उपकारः- help, service, रसिकः- one with interest, feeling- सततः उपकारः- सततोपकारः- वि. पू. प. कर्मधारय स. & सततोपकारे रसिकः- सततोपकाररसिकः- स. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., अच्छा- pure, transparent, मतिः- mind, thinking, understanding- both in स्त्री. लिं. प्र. वि. ए. व., यस्य- whose- in पु/न. लिं. ष. वि. ए. व. of यद्- who, श्रवणेन- in पु/न. लिं. तृ. वि. ए. व. of श्रवण- listening, studying, द्वैतान्धकारोदयः- dispelling darkness of dualism- द्वैतम्- duality, dualism, अन्धकारः- darkness, उदयः- rise, elevation, enlightenment- द्वैतस्य अन्धकारः- द्वैतान्धकारः- ष. तत्पुरुष स. & द्वैतान्धकारात् उदयः- पं. तत्पुरुष स., तत्त्वावबोधः- perception of exact nature- तत्त्व- true fact, essential nature अवबोधः- knowledge, perception, कः (किम)- who, what, शत्रुः- enemy, adversary, खेददानकुशलः- one who is expert in giving distress- खेदः- distress, pain, दान- giving, कुशलः- expert, well versed- खेदस्य दानम्- खेददानम् & खेददाने कुशलः- स. तत्पुरुष स., दुर्वासनासञ्चयः- one with many bad habits- दुर्- अव्यय- prefix implies bad, wicked, वासना- desire, inclination, सञ्चयः- collection, stock, accumulation- दुष्टा वासना- दुर्वासना- प्रादि कर्मधारय स. & दुर्वासनानाम् सञ्चयः- ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., गलति- वर्त. प्र. पु. ए. व. of गल्- १ ग. प. प. to drop, fall down, disappear, वद- आज्ञार्थ म. पु. ए. व. of वद्- वदति १ ग. प. प. to say, speak, सखे- in पु. लिं. सं. वि. ए. व. of सखि (सखा) - friend